थाप्रबोधात् तत्वज्ञानात् अविद्यामाः स्वनाश लक्षणमदृष्टस्यानुत्पादलक्षणं भयमतः साम्यादवि
द्यापदेन इदमेवोच्यते प्रपंचप्रतारणामिति मिथ्याज्ञानं वा तद्रचनायाः कल्लोलः परम्परा तस्य कोलाहलः
किं वदंती सरितीयस्य साक्षात्साक्षितया जगत् प्रत्यक्षविषयकतयांऽशेतो द्वेषादितिर्हीनः अभिसर्व
तोरतिं आत्मसाक्षात्कारस्वरूपां॥ ॥ इति प्रथमः स्तवकः॥ ॥ नन्वदृष्टासिद्धावपि न तस्य वे
दकर्तृत्वं न चाप्तोक्तत्वेन वेदप्रामाण्यं तथा वात्र परमाप्तः परमेश्वरः कर्त्तेति वाच्यं नित्यनिर्दोष
त्वेन तत्प्रामाण्योपपत्तेः किंचसर्वज्ञेन केनचिदुक्तत्वादेवैवेदप्रामाण्यमुपपद्यते किमीश्वरेणेति चेन्न। प्रमा
याः परंतत्रत्वात् सर्गप्रलयसंभवात्। महत्यस्मिन्ननाश्वासात्र विधांतरसंभवः॥ परंतत्रत्वप्रमालघ

रित्वधर्मावच्छिन्नकार्यतावत्त्वं प्रमामात्रस्य गुणजन्यत्वात् शाब्दप्रमाया वक्तृयथार्थवाक्यार्थज्ञानजन्यत्वाद्य
२६ ताहशज्ञानवानीश्वर एव रःसिध्यति वस्तुतः प्रमात्वमेकं नास्ति घटत्वादिप्रमात्वमेव कार्यतावच्छेदकं तत्र घटत्व
प्रकारकप्रमात्वेन कारणताजन्यत्वविशेषितं घटत्वादिप्रमात्वं कार्यतावच्छेदकं धारावाहिकादिस्थले तथाक
२९ ल्पनादितिकूटलिंगकयथार्थानुमितावन्यत्रापीश्वरीयज्ञानं गुणः एतेन वक्तृज्ञानं न शाब्दबोधहेतुः योग्यता
प्रमात एव शाब्दप्रमोत्पत्तेरिति निरस्तं। विशेष्यसंबद्धविशेषणज्ञानं घटत्वप्रमासामान्ये हेतुरित्यप्येके। ए
वं प्रामाण्यं परतोग्राह्यमत इत्यपि योध्येयं ग्राह्यत्वेऽनभ्यासदशायां ज्ञानग्राहकेण तद्ग्रहात्संशयो न
स्यात् न च दोषाभावोऽप्रमासतेऽनंतत्वात् तत्क्षणरूपदोषप्रतिबंधकत्वमुपेक्ष्य प्रामाण्यमनुपस्थितं न भा
सत इत्यस्य कल्पनान्नथा च घटविशेष्यकत्वस्य पुरोवर्त्तिविशेष्यकत्वस्य वा ज्ञानं घटत्वप्रामाण्यज्ञा राम.
ने कारणमिति कल्प्यत इति सिद्धं विशिष्टोपरीत चतुष्कस्थलेऽतिप्रसंगभयाय रजतविशेष्यकत्वावच्छि २६

न्नरजतत्वप्रकारकत्वं प्रामाण्यं तच्च नानुव्यवसाये भासतेऽवच्छिन्नत्वादेरनुपस्थितत्वादित्यन्ये। ननु वेदस्य नित्य
त्वे निर्दोषतया प्रामाण्योपपत्तेः किं। कर्त्राईश्वरेण ब्रह्मजन्यत्वेपि न प्रामाण्यग्रहार्थं तदुपयोगो महाजनपरि
ग्रहेणैव प्रामाण्यग्रहोपपत्तेरित्यत आह सर्गेति तथा च वेदमहाजनयोरभावात् कस्य केन परिग्रह इति भावः य
द्वस्तुतो वेदस्य न नित्यत्वं संभवति वर्णानामनित्यत्वेन तद्घटितस्य लौकिकानुपूर्वीकस्याप्यनित्यत्वात् तथा च प्र
वाहनित्यतैवोच्यात तत्र चेदमुत्तरं सर्गप्रलयेति ननु कपिलादय एव संप्रति वेदवक्तारः व्यवहारप्रवर्तयितारश्च
किमीश्वरेणेत्यत आह तदस्मिन्निति यदि कापिलादयः पूर्वसर्गहृतेयोगजधर्मेण सर्वज्ञाः प्रतिसर्गं स्वीकर
णीयाः भिन्नाभिन्नास्तदा लाघवादेक एव ईश्वरः स्वीक्रियतां यदि च तेन सर्वज्ञास्तदा तेषां वचनान्मा स एवेति
न ततः प्रत्ययानुपपत्तिरिति भावः। तथाविधान्तरं नास्तीत्यर्थः ननु वर्णा नित्या एव इति न प्रलये तद्विच्छेदः सो
यं गकार इति प्रत्यभिज्ञानात् निमित्तवायुसंयोगोपि वर्णानां व्यंजकः घटादीनामालोक इव न तूत्पादक इ

तिचेन्न वर्णानां नित्यत्वेप्यानुपूर्व्या अनित्यत्वाद्दृष्टोप्यनित्य एव नवा वर्णा नित्यास्तथाहि अस्तिसोयं गकार इति
३० प्रत्यक्ष्यं विषयभेदोवाच्यः तत्र प्रत्यभिज्ञायास्तज्जातीयाभेदविषयकत्वं कल्प्यते सैवेयं दीपकलिकेतिवत्
30 । न चोसन्न इति धीरेवारोपरूपा तथा सत्युत्पत्तिमत्तावगाहने व्यावर्तकधर्मदर्शनात् सोयमित्यभेदधीन्न
स्यात् न चान्यनिष्ठोत्पत्तिः परस्येर्यावर्णे भासते उत्पत्तिः खलघतत्वे नान्योत्पत्ते रन्यत्र भानस्यासंभवात् स एव
गकारो मया ऽष्ट्रत्वदुच्चारितेति धीस्तु तदेव मया ऽष्ट्रत्वोमुक्तमिति प्रतीतेस्तुल्या किं चलारो गकारस्तारो मंदोन्य
इति प्रतीतेर्नानागकारः नच वायुनिष्ठतावयमेवतत्र बोध्यते तथासति ह्रस्वत्वादिकमपि वायुनिष्ठमेव भास
त इति वक्तुं शक्यत इति न गत्येकवर्णप्रसंगः । परे तु नैमित्त वायुसंयोगस्य लाघवेन कत्वं कार्यतावच्छेदकं नतु
प्रत्यक्षं न च प्रकारतासंबंधेन कत्वं तथा सतीदंतादिना शब्दत्वाद्दिना च प्रत्यक्षं न स्यात् ननु प्रकारके प्रत्यक्षा राम.
नुरोधेन च भिन्नभिन्नकार्यकारणभावकल्पने गौरवान्न न च भवता कोलाहलस्थाने न दोषादिनात्मत्वा ३०

दिप्रत्यक्षमितिवक्तव्यं तथाचानंतदोषकल्पनामपेक्ष्य लाघवान्नित्तवायुविशेषस्यैव व्यंजकत्वमस्त्वितिवा
क्तव्यं तथासति शुक्तित्वप्रकारकप्रत्यक्षेपिविजातीयवात्मसंयोगोहेतुरुच्यतामितितत्रापिदोषात् शुक्तिः
त्वप्रत्यक्षमितिनस्यादितिआहुः। ननुनसर्गप्रलययोः प्रथमत्वेनाभिमताहोरात्रस्याहोरात्रत्वेनाव्यवहिता
अहोरात्रपूर्वकत्वानुमानात् किंच कर्मणां विषमविपाकतया एकदासकलकर्मणां वृत्तिनिरोधस्यास
म्भवात् कालत्वस्य भोगव्याप्यत्वात् किंच ब्राह्मणजन्यस्य ब्राह्मणत्वमिति सर्गादौ तदभावात् आद्यब्राह्मणस्य ब्रा
ह्मणत्वाभावे इदानींतनानामपि न ब्राह्मण्यं स्यात् किंच प्रयोज्यप्रयोजकभावेन व्यवहारादिना शक्तिग्रहाभावा
त् शब्दव्यवहार एवोच्छिद्येत किंच घटादिनिर्माणदर्शनेन सर्गादौ च तद्दर्शनाभावात् घटसंप्रदायोच्छेदा
पत्तिरितिचेन्नावर्षादिवद्वोपाधिवृत्तिनिरोधस्तु सुप्तिवत् उद्भिद्वृश्चिकवद्वर्णीमासावत् समयादयः॥
अहोरात्रपूर्वकत्वेसाध्ये सिद्धसाधनं पूर्वसर्गीयाहोरात्रपूर्वकत्वात् अनंतर पूर्वकत्वे ऽप्रयोजकत्वात्

वर्षादिमपूर्वकत्वहिने नियमभंगवदुपपत्तेः राश्यादिविशेषसंसर्गरूपकालोपाधिप्रयुक्तं हि तत्तदभावप्रएव तद्व्या
३१ वृत्तेः तथेहापि सर्गानुवृत्तिनिमित्तब्रह्मांडस्थितिरूपकालोपाधिनिबंधनात्। तस्य तदभावएव व्यावृत्तौ को दोषइ
तिसूत्रं। अत्र शंकरमिश्राः अनंतरेतिवर्षाप्रथमदिनस्य यथा वर्षादिनाव्यवहितपूर्वकत्वं साध्ये उपाधिस्तथा ब्रह्मां
31 डस्थित्यवच्छिन्नप्रथमाहोरात्रा। तथा प्रकृतेपि स्यादित्यर्थः ननु व्यभिचारे चावश्यमुपाधिरित्यत आह राश्यादि
इति कर्कटप्रथमांशानवच्छिन्नकर्करसिंहान्यतराहोरात्रत्वं यथा वर्षादिनाव्यवहितपूर्वकत्वे साध्ये उपाधिस्त
था ब्रह्मांडस्थित्यवच्छिन्नप्रथमाहोरात्रातिरिक्ताहोरात्रत्वस्य अव्यवहिताहोरात्रपूर्वकत्वे साध्ये उपाधित्वमि
त्यर्थः ननु अरत्प्रथमदिवसे साध्याव्यापकत्वात् नायमुपाधिरिति चेद्वर्षादिनत्वरूपसाधनावच्छिन्नसाध्य
व्यापकत्वात् साधनाव्यापकत्वं तु कर्कटप्रथमांशावच्छिन्नदिन इति। अव्यवहिताहोरात्रपूर्वकत्वे साध्ये राम·
उपाधिमाह भवोपाधिरिति अव्यवहितसंसारपूर्वकत्वमित्यर्थः। अतो न साधनव्यापकता तत्र दृष्टांतो व ३१

र्षादिवदिति यथा वर्षादिनं वर्षादिनपूर्वकं वर्षादिनत्वादि यत्र राशिविशेषावच्छिन्नस्थितसूर्यावच्छिन्नदिनपूर्वक
त्वमुपाधिरित्यर्थः सुषुप्तिकाले कतिपयादृष्टनिरोधवत्कंचित्कालेसमस्तादृष्टवृत्तिनिरोधोपिनानुपपन्न इत्याह
वृत्तिरोध इति कालत्वस्य तु भोगव्याप्यत्वमप्रयोजकत्वात् । आद्यब्राह्मणस्यादृष्टविशेषजन्यत्वादिदानींतनब्रा
ह्मणानां च ब्राह्मणजन्यत्वमिति न पूर्वोक्तदोषः उद्भिदिति शाकविशेषः तस्य यथा तंडुलकणात् शाकबीजविशेषा
च्चोद्भवः यथा वा वृश्चिकस्याद्यस्य गोमयजन्यत्वं अन्येषां वृश्चिकानां वृश्चिकजन्यत्वं तथेति क्षीराद्धि परमाणेर
क्षीरादेव क्षीरादयः परमाणे क्षीरत्वादिजात्युत्तेरभावादित्यर्थः कदलीकांडं च दध्यवेत्रवीजात् न चादृष्टस्य
कारणतायां व्यभिचारः तत्तज्जातिविशेषस्य कार्यतावच्छेदकत्वात् अन्यथा वृत्तिं वृश्चिकादेस्तु दोषापत्ते
रित्याह उद्भिदिति भगवता च प्रयोज्यप्रयोजकभावापन्नानानाकार्यमधिष्ठाय सर्गादौ व्यवहारः प्रवर्त्य
ते ततश्च शक्तिग्रहः न च तत्रेयं प्रवृत्तिर्दर्शनजन्या तज्ज्ञानं शाब्दजन्यं इत्याद्यनुमित्या शक्तिग्रहो भविष्यतीति साध्य।

नुमितिभ्रमरूपाऽतः शक्तिग्रहोपि भ्रमरूप इति चार्वाकविषयाबाधेन शक्तिग्रहस्य प्रमात्वात् यथा मायाविना
३२ स्वतन्त्रसंचाराधिष्ठितदारुपुत्रकद्वयमासाद्य व्यवहारप्रवर्तनेन तद्द्वारा बालो व्युत्पाद्यते एवमीश्वरेण कुलालादि
32 शरीरमुपादाय घटादिसंप्रदायेऽपि प्रवर्तित इत्याह मायावदिति समयः शक्तिग्रहः अत एव नमः कुलालेभ्यो
नमः कर्मकारेभ्य इति श्रुतिरपि संगच्छत इत्याहुः। ननु सर्गादावेव किं मानमिति चेद्विश्वसंतानोयं द्रव्यसंतानश्च
न्येः समवायिभिरारब्धः संतानत्वात्। आरब्धेयसंतानवत् वर्तमानब्रह्माण्डपरमाणवः पूर्वमुत्पादितसजा
तीयसंतानान्तराः नित्यत्वे सति तद्द्वारंभकत्वात् प्रदीपपरमाणुवदित्यवयवानामभावापोह्यापादुत्पत्तिनाशौ।
स्यातां संतानाविच्छेदश्चेति को विरोध इति चेन्न एवं हि पटादिसंतानविच्छेदोपि न स्यात् तद्विपर्ययस्तु दृश्यते क
र्त्रादिभोगसंपादनप्रयुक्तोऽसाविति चेन्न द्व्यणुकादिषु तदभावात् तथा च तद्द्व्यणुकानामनुपगमाभावेऽना राम
दित्वप्रसंगे द्व्यणुकत्वव्याघातः तस्माद्यत्कार्यं यन्निबंधनं स्थितितदपगमे तस्य निवृत्तिः प्रदीपं तुकं यत्तदुप ३२

गमेनस्योत्पत्तिःनचकार्यस्यस्थितिनिबंधनंनित्यमेव नित्यस्थितिप्रसंगान्नचनित्यएवहेतुरकादाचित्कत्वेप्रसं
गइतिनिरंतरंगमेतत् इह इयांश्चव्यवस्थितौभोगोपिकर्मभिरेववस्तुस्वभावानतिक्रमेणसंपादनीयइतिद्व्यणुकवत्।
पिपीलिकांडादेर्ब्रह्मांडपर्यंतस्यचविश्वस्यैयमेवगतिरितिप्रतिबंधसिद्धिः तथाचब्रह्मांडेपरमाणुसद्भावितरिपरमा
णुषुस्वतंत्रेषुप्राणासीनेषुतद्दंतःपातिनःप्राणिनःक्ववर्त्तेतांकुपितकपिकपोलांतर्गतोदुम्बरमशकसमूहवत् द
वदहनदह्यमानदारुद्रवविवरविघूर्णमानघुनसंघातवत् प्रबलपवनोल्लासनीयोर्वीनलनिर्पतितपोतगतसांया
त्रिकसार्थवत्वेतिइतिमूलं। अत्रशंकरमिश्रा। विश्वसंतानोयमितिमानुषपशुगोब्राह्मणादिरूपोयमित्यानी
मनुवर्त्तमानःपक्षः दृश्यसंतानव्यन्येरितिस्व समानजातीयसहकारिशून्यैः समवायिभिःपरमाणुभिरार।
ब्धइतिसाध्यंतथाचग्रामांतरेणापिगौर्ब्राह्मणमंतरेणापिब्राह्मणइतिसिद्धमितिसंतानत्वादितिसमानजा
तीयकार्यप्रवाहत्वादित्यर्थः आरणेयेतियैस्तैजःपरमाणुभिरारणेयवन्हिप्रवाहोजनितस्तत्रवान्हेर्नसहका

शातिदृष्टांतः तथाचब्राह्मणप्रवाहस्यमूलभूतोब्राह्मणीनब्राह्मणसहकृतैः परमाणुभिरारब्धः किंत्वदृष्टो
३३ पगृहीतैरितिभावः एतेनब्रह्मांडपक्षत्वे आश्रयासिद्धिः कार्यमात्रपक्षत्वे क्रमारंभेणसिद्धसाधनमितिपरा
33 स्तं। यद्वासमयसमवायिभिन्नवृत्तिध्वंसप्रतियोग्यवृत्तिकार्यद्रव्यत्वंकार्यद्रव्यप्रागभावसमानकालीनका
र्यद्रव्यानधिकरणवृत्तिध्वंसप्रतियोगिवृत्तिकार्यवृत्तिधर्मत्वात्शब्दत्ववत्। यद्वाकार्यद्रव्यत्वंस्वाधिकरणान
धिकरणकालवृत्तिध्वंसप्रतियोगिवृत्तिकार्यमात्रवृत्तिधर्मत्वात् एतद्दीपत्ववत्। यद्वापरमाणवः कार्यद्रव्य
समानकालिकपरमाणुक्रियातिरिक्तक्रियारंभः मूर्त्तत्वात्पटवदित्यवांतरप्रलयेमहाप्रलयेचकार्यसमा
नकालिकतद्वृत्तिध्वंसान्यध्वंसवंतः ततएवतद्वदिति एतदन्यगुणवत्वंचात्रनोपाधिः पक्षेतरतुल्यत्वादितिय
द्वाकालकपालान्यावृत्तिर्घटप्रागभावः कार्यद्रव्यानधिकरणवृत्तिः प्रागभावत्वात्रूपादिप्रागभाववदि राम.
त्याहुः। लीलावतीकृतस्तुएककालीनाः सर्वेपरमाणवः कदाचित्समग्रोपादेयप्रतिबंधशून्याआरंभ ३३

कपरमाणुवदित्यनुमानमाहुः। तन्नकार्यद्रव्यानधिकरणकालमात्रवृत्तित्वस्योपाधित्वात्। वर्त्तमानेति ब्रह्मां
डस्यचागमसिद्धत्वात्तन्नाश्रयासिद्धिः परम्परयारंभकत्वविवक्षयारब्धब्रह्मांडरमूलद्व्यणुकादिति वासाध्यं तं
तुकपालादिषु व्यभिचारवारणाय नित्यत्वे सतीति। व्योमादावनैकांतिकत्वनिरासार्थमारंभकत्वादिति आरंभक
त्वमिह द्रव्यसमवायिकारणत्वं विवक्षितं आवायोर्द्व्योऽपगमापगमौ यावत्सत्यभिन्नमवयविस्थितेरितिमी
मांसकसिद्धांतवत्। एवं हीति घटपटादीनामंत्यतोच्छेदे नस्यादित्यर्थः विपर्ययस्त्विति घटपटादिध्वंसस्त्वया
पिस्वीक्रियते अनुभूयते चतेन तत्तुल्यन्यायतयासमवाय्यसमवायिकारणविनाशाद् ब्रह्मांडविनाशोऽपि
कथंनस्यादित्यर्थः। ननुघटादिध्वंसः कुलालादिदुःखानुभवरूपभोगसंपादकतयास्वीक्रियतां ब्रह्मांड
ध्वंसेतुमैवमिति तद्ध्वंसोपिनाभ्युपेयतामितिशंकते भागेति असौघटादिध्वंसः द्व्यणुकनाशेकस्यदुःखा
नुभव इति सोपिनस्यादित्याह द्व्यणुकादिष्विति तत्राप्यवयवापगमाध। नएवंध्वंसव्यवहारोलुकोदाषड्

त्यत आह तथा चेति तथा च संतानमुच्छिद्यत इति नियम एव इति भावः । यन्निबंधनस्थितीति अदृष्टं समवा
३५ व्याद्यित् कार्यस्थितिप्रयोजकं तद्विनाशेन तत्कार्यं विनश्यतीत्यर्थः नित्यस्थितिप्रसंगादिति कार्यस्येत्य
34 नुषंगः । नचेति हेतोर्नित्यत्वे कार्यमपि नित्यं स्यात् कादाचित्कत्वे नियामकाभावादित्यर्थः । निस्तरंगनिः
शेषं एतद्रूपसंतानशून्यपरमाण्वारभ्यत्वं ब्रह्मांडपरमाणूनामुत्पादितसजातीयांतरत्वं च ह्रस्वतरपरमा
णावस्थितत्वे न निस्तरंगमित्यर्थः ननु कर्मभिर्भोगसंपादनं क्रमिकमेवास्तु तथा च कुतः प्रलय इत्यत आह
इदृश्यामिति कार्याणां निबंधनस्थितिकत्वसिद्धौ कर्मभिर्भोगोऽप्येवं वस्तुस्वभावानतिक्रमेणैव संपा
दनीय इति योजना इयमेवेति पिपीलिकाद्युत्पत्तोच्छेदः तन्मूलपरमाणूनां उत्पादितसजातीयांतर
त्वं चेत्यर्थः ननु ब्रह्मांडनाशेऽपि गिरिसागरादीनां तादवस्थ्यात् कुतः प्रलय इत्यत आह तथा चेति क्व राम:
र्तितामिति आश्रयनाशेन नंक्ष्यतीत्यर्थः ब्रह्मांडमध्यवर्तीनि कार्यद्रव्याणि ब्रह्मांडे नश्यति नश्यंतीति ३५

ग्येनैकाधारत्वात् विलीयमानाधारत्वाच्छिन्नाभ्यत्वादित्यत्र हेतुत्रये दृष्टांतत्रयं अतश्चोच्छेदनानंतरं पु
नः प्रवाहस्त्वदनंतरं पुनरुच्छेद इति सारस्वतमिव स्रोतः स्यथा स्रुतप्रसंगात् तथा च भावि प्रवाहस्य वर्तमान
स्य समुच्छेदपूर्वकमित्यनुमिमीयते स्मरति च भगवान् व्यासो गीतासु वचनं। यदा यदा हि धर्मस्य ग्लानिर्भ
वति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् इत्येवं कर्मणां वृत्तिनिरोधेन किंचिदुत्सर्गेतेन किंचि
द्विनश्यतीति सिमिता काश्यप कल्पे जगति कुतो विशेषात् पुनः सर्गः प्रकृतिपरिणतेरिति सांख्यानां शो
भते ब्रह्मपरिणतिरिति भास्कर गोत्रमुख्ये ते वासनापरिपाकादिति सौगतमतमनुधावति काल वि
शेषादिति चोपाधिविशेषाभावादित्य सम गतं न शरीरसंक्षोभश्रमजनितनिद्राणां प्राणिनां आयु
षः परिपाकसंपादनैकप्रयोजनस्य श्वाससंतानस्यानुवृत्तिश्च न महाभूतसंभवसंक्षोभलब्धसं
स्काराणां परमाणूनां मंदतरतमादिभावेन कालावच्छेदसंपादनैकप्रयोजनस्य प्रचयाख्य संयो

गपर्यंतस्य कर्मसंतानस्येश्वरनिश्वसितस्यानिवृत्ते ब्रह्मांडांतरव्यवहारोऽथवा कालोपाधिः तदवच्छिन्ने का
३५ लेपुनः सर्गः यथा खल्वेकलावुल्लतायाविततानि फलानि तथा परमेश्वरशक्तावनुसंततानि सहस्रशोऽडा
निइति चेतनस्य पुरुषस्योपरागः प्रकृतौ स एव परिणाममलन इत्यर्थः पंगवंधवदुभयोरपिसंसर्ग इति। ब्र
35 ह्मेति घटपटकटादिभावेन ब्रह्मैव परिणमत इति भास्करीयास्त्रिहंडिन इत्यर्थः। एकं द्वित्रि नत्तु प्रपंचस्यमि
थ्यात्वमेव वदन्त्येतास्तेनेति अनादिवासनामात्राधीना घटादिव्यवहृतिर्न तु घटादिः परमार्थिक इत्यर्थः ब्र
ह्मांडनानात्वे प्रमाणमाह यथेति तिग्रंकरमिश्राः। एवं बाधके निरस्ते प्रलयसाधकमप्याह जन्मसं
स्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयतां। वेदादिसंप्रदायोऽ
यमत्यंतमुत्स्येति ह्रसमानत्वात् प्रदीपवदित्याद्यनुमानेनात्यंतह्रासप्रसिद्धिः अत्रस्वरूपासिद्धिनिरासा राम-
याह जन्मेति। अत्र पूर्वमानस्यः प्रजाः सम्भवन्। अतोऽपत्येकप्रयोजनमैथुनसंभवाः ततः काया ३५

वर्जनीयजन्मानः इदानीं तु देशकालाद्यवस्थया पशुधर्मभवभक्ष्यविष्ठादिति जन्महासः तथा पूर्वं चरुप्रभृ
तिषु संस्काराः ततः क्षेत्रप्रभृतिषु ततो गर्भाधानादिषु इदानीं तु जातेषु लोकव्यवहारमाश्रित्य इति संस्कारह्रा
सः पूर्वं सहस्रशाखो वेदोऽध्यगायि ततोऽप्यल्पषडङ्गएकः इदानीं तु क्वचिदेकशाखेति विद्याह्रासः आ
दिवन्ति धर्मादेः संग्रहः पूर्वं मृतवत्त्वयो ब्राह्मणाः प्रायो तिष्ठत ततोऽमृतवत्त्वपयः७ ततोनन्तवत्त्वयः संप्रति
प्रभृतसत्यानन्तकुशीद पाशुपाद्यन्नवन्ति भूयांसधर्मह्रासस्तु पूर्वं चतुष्पाद्धर्म आसीत् ननूयमा
नेतपसि त्रिपात् ग्लायमाने ज्ञाने द्विपात् इदानीं जीर्यति यत्ते दानैकपात् सोपि वादकुरागतादिविपादि
काशात दुःस्थोऽश्वद्धमलकलंकितः कामक्रोधादिकंटकजर्जरितः प्रत्यहमपगीयमनवीर्यतया तत
इतः सबलत्वेनावतिष्ठत इति शक्तिर्बलमध्ययनप्रयोजनकं तस्य ह्रासः पूर्वेषामपेक्षया इदानींतनानां
स्फुटएवस्वाध्यायोऽध्ययनं तदपकर्षः पूर्वेषामपेक्षयाति व्यक्तः कर्मयागादि तदपकर्षोपि पूर्वापेक्षया

ःति नृत्न एव यद्यपि विद्याहा स एक एव तथापि स्वाध्यायस्याध्ययनरूपस्य कारणस्याभावे न विद्याहा

२६ सद्भूतिस्तु चापि नुंस्य गुणान्॥ कारं कारमलौकिकाद्भुतमयं मायावशात् संहरन् हारं हारमपीन्द्र

जालमिव यः कुर्वन् जगत् क्रीडति। तं देवं निरवग्रहस्फुरदभिध्यानानुभावं विश्वासैकभुवं शिवं प्र

36 ति नमन् भूयासमंतेष्वपि॥ कृत्वा कृत्वा संहरन् हृत्वा हृत्वा यः क्रीडति एवं जगन्मूलकारणं निष्प्रति

बंधस्फुरदध्यानानुभावं शिवं प्रत्युद्दिश्य नमन् अंतकालेष्वपि भूयासमिति॥ ॥इति द्वितीयस्तवकः

॥ ॥ नन्वीश्वरे योग्यानुपलब्धेरेव बाधिकातया हि यदीश्वरः स्यादुपलभ्येत स न तथा योग्यत्वा

न्नोपलभ्यत इति चेत् तत्राशरीरं गमयोग्यत्वान्नोपलभ्यत इति तदभावोऽपि न सिद्ध्येत्। शरीरं गत्वं योग्यसंस्था

नव्यंगतया योग्यत्वव्याप्यमिति नायोग्यशरीरं गसिद्धिरिति चेन्नैतन्न स्यापि शरीरित्वनियमेन तद्विशि राम

ष्टस्य प्रत्यक्षबाध एव किंच प्रवृत्तेरिष्टसाधनताज्ञानव्याप्यतया तदभावादेव तस्य न कर्तृत्वमिति २६

चेन्न । योग्या दृष्टिः कुतो योग्ये प्रतिबंधेः कुतस्तरां । क्वायोग्यं बाध्यते शृंगं क्वानुमानमनाश्रयं । योग्या दृ
ष्टिः योग्यानुपलब्धिः अयोग्ये परमात्मनि क्केत्यर्थः । नन्वेवमयोग्य शशशृंगाभावोपि न सिद्ध्येत्ततः प्र
तिबंधिरिति नहि शशशृंगाभावो योग्यानुपलब्ध्या सिद्ध्यतीति क्रमः येन प्रतिबंधिः स्यात् किंतु साधका
भावान्न शशशृंगसिद्धिः शशत्वपशुत्वादीनामप्रयोजकत्वादीश्वरसाधकानां तु कार्यादीनामग्रे वक्ष्य
माणत्वादिति भावः यदि तु योग्यमेव शृंगं तदा सुतरां न प्रतिबन्धिरित्यर्थः पूर्वोक्तमेव विवृणोति क्वायो
ग्यमिति ईश्वरो न कर्ता इष्टसाधनताज्ञानविरहात् शरीराभावाद्वेति पुनरनुमानमाश्रयस्य पक्षस्या
ज्ञानादनुपपन्नं ज्ञाने तु धर्मिग्राहकमानेन तस्य कर्तृत्वसिद्धावुक्तानुमानस्य दुर्बलतया न कर्तृत्वा
भावसाधकत्वमिति न वेष्टसाधनताज्ञानाभाव ईश्वरे कार्याणामीश्वरेच्छाविषयत्वेन तत्साधन
ताज्ञानसत्वादिति ॥ असत् — ख्यात्युपस्थितित एवेश्वरः पक्ष इति चेत् । व्याघेश्याभाववत्त्वेन भाविक)

द्विविशेष्यता। अभावविरहात्मत्वं वस्तुनः प्रतियोगिता। व्यावर्त्यः प्रतिक्षेप्यः तद्वत्ताभाविकी पारमा
२७ र्थिकी विशेष्यताश्रयता वस्तुनो वस्तुन एव पद्य सतख्यात्युपनीते परमात्मनि कर्तृत्वाभावः सा
37 ध्यस्तदा तस्य साध्यवत्त्वेन वस्तुभूतत्वमेवायाति अन्यथा साध्याश्रयत्वमेव न स्यात् एवं साधनताश्रय
त्वभावासिद्धेर्नानिष्टमस्माकमिति। अथ नेश्वरे कर्तृत्वाभावः किंत्वीश्वराभाव एव साध्यते इति चेत्तस्य
ईश्वरस्याभावसिद्धौ ईश्वरेपि प्रतियोगित्वं सिद्धं तच्च तदभावाभावत्वं वस्तुन एवेति तस्य च वस्तुत्वमेवास
तख्यात्येश्वरोपस्थितौ तदभावः सेत्स्यतीति चेत्तथापीश्वरप्रतियोगिकाभावासिद्धेः वस्तुगर्भत्वात्
प्रतियोगिताया इत्यभिप्रेत्याह अभावविरहे इति असतो न प्रत्यक्षं सन्निकर्षाभावात् नानुमानं तेन
रूपेण व्याप्यग्रहात् न शाब्दधीः तत्र शक्तिग्रहासंभवादिति नासमञ्जसवादिति ना सतख्यातिरिति स्मर्त राम:
व्यं किंचानुपलब्धिमात्रान्नाभावसिद्धिस्तथा तिंद्रियेंद्रियविलोपप्रसंगात् अंधकारे घटाभावप्रत्यक्षा २७

पक्षे च किंतु योग्यानुपलब्धितः सा च प्रतियोगितद्व्याप्येतरयावत्तत्प्रमापकसहितानुपलब्धिः। न च सा
लौकिकेति या च तदुपलंभसामग्री सा च दोषघटितान च तस्यामनुपलंभोस्ति तस्योपलंभस्यैव जननादित्याह। दु
ष्टोपलंभसामग्रीः शशशृंगादिर्योग्यता। न तस्यां नोपलंभोस्ति नास्ति सानुपलंभने। दुष्टोपलंभसामग्री दोष
सचिवोपलंभसामग्री सा चेत् तदा शशशृंगादिर्योग्यता शशशृंगाद्युपलंभ एव तस्यां दोषघटितयावत्प्र
तियोग्युपलंभकरूपसामग्र्यां सत्यां नोपलंभोऽनुपलब्धिरनुपलंभनेऽनुपलब्धिः दृश्यायां सामग्र्यामस्ति अनु
पलब्धिमात्रेणाभावाग्राहकमतिप्रसंगात् किंतु योग्योनुपलब्धि योग्यता च प्रतियोगि त्यादिगर्भा तथा च प्र
तियोगितद्व्याप्येतरयावत्तदुपलंभककालीनतदभावो दोषाभावादिति न योग्यानुपलब्धिः वस्तुतस्तूप
लंभकपदं प्रमापकपरं वाच्यमन्यथा भूतले दोषघटत्वाभावाध्यक्षं न स्यात् घटभ्रमजनकदोषाभावादिति
तथा च शशशृंगप्रमापिकासामग्र्यप्रसिद्धेरिति ध्येयं। एवं प्रतियोगितावच्छेदकविशिष्टतानमेव अभाव

ज्ञानेकारणं यद्वि च शशशृंगमिति ज्ञानं तदा शशशृंगोपलब्धेरेव यदि च न तदा न प्रतियोगितावच्छेदकविशि
३८ ष्टज्ञानमिति नोभयथाऽभावधीरिति शशशृंगं नास्तीति धीस्तु शशशृंगाभावविषयिणीति न नुमहदितरे आत्म
38 नो न सर्वज्ञाश्चेतनत्वाद्दहमिव एवं नाक्षितिकर्त्तारः इत्यसाध्यं न च सर्वज्ञत्वं परमतेऽसिद्धं यत्किंचिद्ज्ञत्वाकर्त्त
त्वयोरेव साध्यत्वात् अनुमानोद्देश्यकजन्ये ईश्वरासिद्धिरिति चेन्न दृष्टसिद्धिः प्रसिद्धांशे हेत्वसिद्धिरगोचरे। ना
न्यासामान्यतः सिद्धिर्जाता वपि तथैव सा॥ अत्र प्रसिद्धस्य चैत्रात्मदेः पक्षत्वे सिद्धसाधनं अन्यस्याज्ञानेन
तत्र हेतोरज्ञानं नन्वात्मत्वरूपेण ज्ञानेस्यात्तस्याप्यत आह नान्यासामान्यत इति आत्मत्वेनापि रूपेण चैत्रा
त्मादीनां भाने सिद्धसाधनं अन्यस्यानुभानमेव न नन्वात्मत्वं न सर्वज्ञसर्वकर्तृवृत्ति जातित्वात्घटत्ववदित्यनुमा
नमेव बाधकं अत आह मानाव पीति अत्र सर्वज्ञादेव प्रसिद्धो साध्याप्रसिद्धिः किंचिद्ज्ञवृत्तित्वे साध्येऽस्म रा.म.
दादिकमादाय सिद्धसाधनमिति तथैवा प्रसिद्धि सिद्धसाधने एव आगमेन लोकेन च सिद्धस्येश्वरस्यासर्वज्ञ ३८

त्वमकर्तृकत्वं च साध्यते इति चेन्न। आगमादेः प्रमाणस्यैवाधनान्निषेधनं। आभासत्वे तु सैव स्यादाश्रयासि
द्धिरुद्धृता॥ ॥मूलं॥ नन्वागमादेर्धर्म्यंशे प्रामाण्येऽथान्यांशेऽप्रामाण्ये विनिगमनाविरहात् तदुभयांशे न तत्सि
द्धावनुपलम्भादेवाभावसिद्धिः नचैवमतीन्द्रियमात्रलोपप्रसंगः चार्वाकस्येष्टत्वात् न चानुमानादेव न तत्सिद्धिस्त
स्याप्रमाणत्वात् लोकव्यवहारस्तु उत्कटकोटिकसंशयादेवानुमानेप्रामाण्यव्यवहारोऽप्यप्रमाण एव
व्याप्तिग्रहादेवशक्यत्वादिति चेन्न॥ दृष्ट्यदृष्ट्योर्न संदेहो भावाभावविनिश्चयात्। अदृष्टिबाधिते हेतौ प्र
त्यक्षमपि दुर्लभं॥ दृष्ट्यदृष्ट्योरिति सप्तमी द्विवचनं दर्शनेऽतत्सत्त्वनिश्चयाददर्शने तदभावनिश्चयात्संश
य एव न स्यात् अदृष्ट्यादर्शने न हेतौ प्रत्यक्षहेतौ तथा च गोलकाद्यदर्शनेन बाधितेऽकुंरादौ च चार्वाकस्य
प्रत्यक्षमपि न स्यात् एवं ग्रहादूर्ध्वं हि निर्गतश्चार्वाको न निवर्तेत पुत्रादिभिरदर्शनेन तस्याभावसिद्धेः प्रत्युत पु
त्रधनाद्यभावावधारणात् सायप्याति शोकविकलः स्वोरस्ताडनं विक्रोशेत ननु तदधिकरणासन्निकर्षेण

नतेषमभावग्रहः सन्निकृष्टे चात्यंताभावग्रहेपि न ध्वंसग्रह इति कुतः श्लोक इति चेत्तर्हि भूमात्मनोऽयोग्य
३९ 39 तया दृष्टादीनामसन्निकृष्टदेशे च देवतादीनामभावसिद्धिरिति चार्वाकमतव्याकोपः अथ यथा कथंचिदधि
करणज्ञाने अभावनिश्चये तत्र तर्हि पुत्राभावं निश्चिनुयाद्देवदत्तः तदधिकरणस्य स्मरणात् परावृत्तोपि पुत्रादि
कं नासादयेदिति तेषां सत्वादेवासादयिष्यतीति चेत्तस्यानुपलंभमात्रेण नाभावसिद्धिः तदापि तेषां सत्वान्नदे
वान्ये क्षणिकास्ते ऽत्यन्ना इति चेत्तदानीं पुत्रोत्पादकहेतुनामनुपलंभेनाभावनिश्चयात् किं चैवं चार्वाक
स्य प्रत्यक्षमपि न स्यात्तत्तद्धर्मायातादिंद्रियस्यानुपलंभेनाभावनिश्चयादिति नानुपलब्धिमात्रमभावगम
कं योग्यानुपलब्धिश्च नास्त्येवेति न परमेश्वरादपूर्वादिनिरासः मीमांसकस्तु तोषयितव्यो भीषयितव्यश्च
अनुपलंभस्याभावासाधकत्वेनापूर्वादिसिद्ध्यातोषणं योग्यानुपलब्धेरेवबाधकत्वान्नायोग्यपरमा राम-
त्मबाध इति भीषणं यद्यनुपलंभमात्रान्नाभावनिश्चयस्तदैतीन्द्रियोपाधिशंकया व्याप्त्यनिश्चयात्ना ३९

नुमानमिति नेश्वरसिद्धिः न च भूयोदर्शनाद्देव व्याप्तिग्रहः भूयस्त्वस्य त्रिचतुरादित्वेनाननुगमात् सहस्रशः सह
चरितयोरपि पार्थिवत्वलोहलेख्यत्वयोर्हीरके व्यभिचारदिति चेन्न॥ शंकाचेदनुमास्त्येव न चेच्छंका तत
स्तराम्। व्याघातावधिराशंका तर्कः शंकावधिर्मतः। कालांतरीयदेशांतरीयधूमे व्यभिचारसंशया
न्न व्याप्तिग्रह इति क्रषेऽपलभ्यमानधूमे वा तत्संशये शयान्नाघः कालांतरीयधूमविषयिणी शंका चेत्
तदाऽनुमाऽनुमानमस्त्येव कालांतरीयधूमादेरनुमानं विनाऽज्ञानात् नांत्यः वन्ह्यधिकरणवृत्तित्वेन ज्ञा
यमाने तदसंभवात् ननु सामान्यलक्षणया देशांतरीयधूमादेरुपस्थितिः स्यादनुमानप्रामाण्यस्वीकारि
णाभवता तदस्वीकारात् अस्तु वा तत्रैव धूमे धूमत्वेन व्यभिचारसंशयः धूमत्वावच्छेदेनाव्यभिचारनिश्च
यस्यैव धूमत्वरूपेण व्यभिचारसंशयविरोधित्वात् अत आह तर्कः शंकावधिरिति तर्क एव व्यभिचा
रशंकानिवर्तक इत्यर्थः ननु तर्कस्य व्याप्तिमूलकतया तर्कांतरापेक्षायामनवस्थेत्यत आह व्याघाता

धिरितिपचनतर्कमूलीभूतव्याप्तिग्रहे प्रवृत्तिप्रयोजकान्वयाद्यनुविधानज्ञानमेव शंकाप्रतिबंधकं तत्र
४० नतर्कांतरापेक्षा तथाच वन्ह्यसमवहिताजन्योऽयं धूमोयदि वन्ह्यसमवहिताजन्यत्वे सति वह्निसमवहि
तजन्यो न स्यात् अजन्यो न स्यादित्येनेन पक्षविशेषणमहिम्ना वह्निसमवहिताजन्यत्वे सिद्धे वन्हिः साध्यव्यभि
चारव्यावर्त्तकधर्मज्ञानत्वेन व्यभिचारशंकाविरोधिनी अन्यथा वन्हेरेव भविष्यति कचिद्वन्हिं विनापि भ
विष्यत्यहेतुक एवोत्पत्स्यते यद्वाऽयं धूमोऽहेतुक एवोत्पत्स्यत इति शंकनीयं तथा च पक्षविशेषणास्ति
ज्ञान पक्षधर्मतावलमिति वाच्यं तच्च न संभवति पुरोवर्त्तिधूमे वन्ह्यन्वयव्यतिरेकानुविधायित्वनिश्च
येन तदयोगात् न चायमेवास्तु व्यभिचारशंकाविरोधी किं तर्केणेति वाच्यं धूमत्वावच्छेदेन तदनिश्चये
व्यभिचारशंकाया अनुच्छेदात् न च त्वन्मतेपि कथमुक्ततर्केण पुरोवर्त्तिधूमे वन्हिसमवहितजन्यत्वसिद्धौ राम·
लाघवज्ञानसहकारेण धूमत्वावच्छेदेन वन्हिसमवहितजन्यत्वसिद्धिः फलबलेन लाघवज्ञानकाली ४०

न्यभिचारशङ्कान्यव्यभिचारतानस्य प्रतिबंधकत्वकल्पनात् एवं धूमत्वावच्छेदेन वन्हिजन्यतासिद्धिरिति
लाघवात्: तथाहि धूमो यदि वन्हिजन्यो न स्यात्तर्हि वन्ह्यसमवहिताजन्यत्वे सति वन्ह्यसमवधानकालीनवान्हितत्स
मवधाने तत्परयावत्कारणकोनस्यादितितर्कः वन्ह्यजन्यं द्विविधं वन्ह्यसमवहितं तजन्यं जनादिवन्हिसमव
हितजन्यं च धूमरूपादि तत्राद्ये वन्ह्यसमवहिताजन्यत्वमेव नास्ति द्वितीये च नवन्ह्यसमवधानकालीनवह्नि
ततसमवधानेतरं यावत्कारणकत्वं धूमस्य तु वह्नितत्समवधानेतराणि यावंति कारणानि वन्ह्यसमवा
धानकालीनानीति नेष्टापत्तिर्वह्निर्वन्ह्यसमवधानकालीनत्वं वन्हिसमवधानत्वाश्रययावद्व्यक्ति
प्रागभावकालीनत्वं वान्हिसमवधानं च वह्निकारणताघटकप्रत्यासत्तिः वन्हिसंयोगाच्च धूमीयपरमा
णुरूपादिरिति धूमद्व्यणुक एव वह्निहेतुत्वं धूमद्व्यणुकं विना स्थूलधूमोत्पत्तिरिति धूमद्व्यणुके वह्निहेतु
तासिद्धिरपि स्थूलधूमवह्न्योर्व्याप्तिग्रहोपयोगिनी न च यद्धूमकारणीभूतार्द्रेंधनव्यक्तिर्नवन्ह्यसमवधान

कालीनात्तत्र धूमेवन्ह्यसमवधानकालीनयावत्कारणकत्वाभावादिष्टापत्तिः वह्नीन्धनसंयोगरूपसम
वधानप्रागभावकालीनत्वादार्द्रेंधनस्येति न दोष इति केचित्तु भूतले घटाभाववद्वपुरोवर्त्तिधूमे व्यभिचारा
भावो योग्यतासापवात् धूमत्वावच्छेदेन गृह्यते एवमन्यत्रापि व्यभिचारसंशयो न स्यादेव साधारणधर्म
ज्ञानादेरभावादिति यत्र न संशयस्तत्रानिरवाधो व्याप्तिग्रह इत्याहुः। इदं तु बोध्यं तर्को न व्याप्तिग्राहकः
व्यभिचारज्ञानाभावादेव तदुत्पत्तेः सत्युतान्निवृत्तौ क्वचिदुपयुज्यते तन्निवर्त्तकमपि तस्य द्वेधा क्वचिद्विशे
षदर्शनात्मके सति तस्मिन्न सा नोत्पद्यते यथा तद्भूमादौ तर्कावतारे क्वचित्तु स्थितापि शंकाततत्सहकारा
त्प्रतिबंधिकाः अनुकूलतर्ककालीनव्यभिचारसंशयान्यव्यभिचारज्ञानस्य प्रतिबंधकत्वात् यथा त
त्रैव धूमत्वेन व्याप्यवत्तामितिज्ञाने सति क्वचिद्वह्निं विनापि भविष्यतीति शंका स्थितापि न प्रतिबंधिकेति पक्षी रा.म.
यव्यभिचारशंकापि प्रतिबंधिका यत्र नानुकूलतर्कः अत एव पक्षेतरानोपाधिः नवानुमानमात्रोच्छेदः अ ४१

नुकूलतर्काभावसद्भावाभ्यां तदुपपत्तेस्तदुक्तं । यावच्चाव्यतिरेकित्वं शतशोनापि शंक्यते । विपक्षस्य कुतस्ता
वद्धेतोर्गमणिकारणं । विपक्षस्य विपक्षे हेतोः अव्यतिरेकित्वं यावत्तच्छक्यते शतशोपनापीति अनुतर्कादपि
शंका यावत्स्यादित्यर्थः गमनिकारणं गमकत्वसामर्थ्यं इदमपि तर्कानवतारदशायां व्यभिचारशंकाचोपाधि
शंकाधीनातदुक्तं ॥ येन्येपरप्रयुक्तानां व्याप्तिनामुपजीविकाः तैर्दृष्टैरपि नैव दृष्टा व्यापकांशावधारणा ।
ये केचनेसोपाधयो हेतवः परप्रयुक्तानां व्याप्तीनामुपजीवकाः उपाध्यवच्छिन्नहेतुनिष्ठा व्याप्तिर्हेतुताव
च्छेदकावच्छिन्नवृत्तितया ज्ञायते एवमुपाधिसंशयाद्व्यभिचारसंशयोपि तैः सोपाधिभिर्दृष्टैर्ज्ञातैर्व्याप
कांशस्य पक्षे व्यापकस्यावधारणा निश्चयो नेष्यत इत्यर्थः ननु तथापि व्याप्तिस्वरूपस्य दुर्वचत्वान्नानुमा
नं प्रमाणं तथाहि साध्याभाववदवृत्तित्वं न व्याप्तिः केवलान्वयिसाध्यकाव्याप्तेनाप्युपाध्यभावः उपाधे
र्दुर्वचत्वात् न च साध्यव्यापकत्वे सति साधनाव्यापकत्वं तत्त्वं सम्भावामो मित्रातनयत्वादित्यादौ शाकपाक

अत्वादय व्याप्तेः नापि साध्यसमानाधिकरणत्वे सति साधनाव्यापकत्वं वह्निमान् धूमादित्यत्र महानशालादाव-
४२ त्तिव्याप्तेः नापि साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं वायुः प्रत्यक्षो मेयत्वादित्यादावुद्भूत-
रूपादौ पक्षधर्मवहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकेऽव्याप्तेः। नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति सा-
52 धनाव्यापकत्वं घटः प्रत्यक्षो विभुत्वादित्यत्र साधनावच्छिन्नसाध्यव्यापके आत्मत्वेऽव्याप्तेः। अत्रोच्यते सा-
ध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नाधिकरणं यद्धर्मावच्छिन्नाधिकरणनिष्ठात्यंताभाव-
प्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन समं सामानाधिकरण्यं तद्धर्मावच्छिन्नेन तद्धर्मावच्छिन्नपा-
वच्छिन्नरूपिता व्याप्तिः। घटवान् कालपरिमाणादित्यत्र कालिकसंबंधेन साध्यतायां तेन संबंधेन प्रतियोगि-
व्यधिकरणो महाकालान्यत्वविशिष्टघटाभाव एव अवच्छेदकत्वं च स्वरूपसंबंधविशेषः कंबुग्रीवादिमा- राम.
नद्रव्यत्वादित्यत्र नातिव्याप्तिः गुरुधर्मस्यापि प्रतियोगितावच्छेदकत्वादिति उपाधित्वं च यद्धर्मावच्छिन्न ४२

साध्यव्यापकत्वंतद्धर्मावच्छिन्नसाधनव्यापकत्वंसाधनसामानाधिकरणधर्मसामान्यापकत्वेसतिसा
ध्यसमानाधिकरणत्वंवाव्यभिचारेन्नापकतयोपाधेर्दूषकताअत्रचहेतुसमानाधिकरणान्योन्याभा
वप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यरूपज्ञानमनुमितौहेतुर्लाघवादितिप्राञ्चः।वस्तुतोऽ
न्योन्याभावगर्भव्याप्तिज्ञानंतदुत्तरानुमितावेवमन्योन्याभावगर्भव्याप्तिज्ञानमपिस्वोत्तरानुमितावि
त्तिन्यूनाधिकदेशवृत्तितयाकार्यतावच्छेदकस्यनलाघवावकाशः विशेषकारणताग्रहोत्तरमनुमिति
कारणज्ञानत्वेनानुमितित्वेनज्ञानत्वेनानुमितित्वेनवासामान्यतःकार्यकारणभावग्रहइतिस्मर्त्तव्यं
ननुतथाप्यतीतानागतस्थलेलिंगाभावात्कथंतस्यानुमितिमत्कारणत्वमितिचेदतएवबाधकान्न
तत्कारणत्वंकिंतुव्याप्तिज्ञानमेवव्यापारस्तुव्याप्यवान्पक्षइतिपरामर्शःफलमनुमितिरितिउपाध्या
यंतुनेश्वरैर्बाधकविषयानतिरेकात्तथाहितस्यविषयःसादृश्यंपदार्थः।तदंस्यादितिनसंभावनीयंयतः॥

परस्पराविरोधे हि न प्रकारांतरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधतः। परस्परविरोधे प्रका
43 रयोः परस्पराभावरूपत्वे सति न प्रकारांतरस्थितिः न तदुभयप्रकारांतरशून्यस्य संभवः तद्धि भावो ऽभावो
वा पदार्थत्वावच्छेदेन तदुभयभेदाभावाद्भावत्वाभावत्वातिरिक्तप्रकारस्यासंभवादिति विरुद्धभावत्वा
भावत्वादिसत्त्वे एकतापि वक्तुमशक्या तदिदं सद्रूपं यदि भावः स्यात् सगुणवन्निर्गुणं वा स्यात् तत्राद्यं
द्रव्यमेव द्वितीयं चाश्रितमनाश्रितं चेति तत्र चोत्तरं समवाये ऽनवस्थाभयात् तत्र समवायास्वीकारात् आ
श्रितं तु सामान्यवन्निः सामान्यं चेति तत्र प्रथममपि स्पंदो ऽस्य द् इति द्विरूपमेव एतच्च यथासंख्यं कर्मगुणाद्
त्युच्यते निः सामान्यं निर्गुणमात्रं च एकाश्रितमनेकाश्रितं च तदपि यथासंख्यं विशेषः सामान्यं च तदेतत्
साहश्यमेतावत् स्वैकांकोटिमादाय यन्नातिरिच्यते ऽनासाद्यन्नपदार्थीभूयस्यानुमुत्सहते एतेन संख्या राम·
द्यो व्याख्याताः। नन्वेवंविधविकल्पेन सामान्यादीनामपि द्रव्यादित्रयांतर्भावः स्यात् अथ व्यवहारानु ४३

पपत्त्या तेषां सिद्धिरिति चेत्तु ल्यं सादृश्ये पि न हीदं सामान्यं तथा सत्युत्कर्षव्यवहारानुपपत्तेः सादृश्यस्य प्रत्या
श्रयं भेदात्सामान्यस्याश्रयभेदेप्यभेदादिति चेन्न तद्भिन्नत्वे सति तद्गतधर्मवत्वस्य सादृश्यत्वात्साधर्म्यज्ञा
त्या द्विरिति किं च यदेव सादृश्यं व्यंजकं तदेव सादृश्यपकार्यजनकमस्त्विति नन्वस्तु सादृश्यं कॢप्तपदार्थ ए
व तथापि तन्नेन्द्रियादिग्राह्यं इन्द्रियापातमात्रेण तत्सदृशोयमिति ज्ञानानुत्पत्तेः लिंगाद्यज्ञानेपि च ज्ञा
यमानत्वादिति चेन्न तथात्वे तत्सादृश्यज्ञानस्य प्रतियोगिज्ञानं विनानुत्पत्तेः न तत्सद्भावे च क्षुरादिनैव तज्ज्ञान
नादिति ननु सादृश्यमात्रस्योपमानापरिच्छेद्यत्वेपि गोप्रतियोगिकगवयनिष्ठसादृश्यस्यानकरणकगवय
प्रतियोगिकगोनिष्ठसादृश्यधीरुपमानफलं न च तत्प्रत्यक्षं विशेष्यस्य गोरसन्निकर्षात् न च विशिष्टस्मरणं पू
र्वाननुभवादिति चेन्न। साधर्म्यमिव वैधर्म्यमानमेवं प्रसज्यते। अर्थापत्तिसमोप्यस्त्विति चेदस्तु तेन किं॥ता
दृशधीः प्रत्यक्षाद्यजन्यार्थापत्तिजन्येवेति नैनत्करणमुपमानं अन्यथा तद्धर्मायमिति बुद्ध्यनंतरं एतद्धि

धर्मोसद्इतिधीकरणंभानांतरंभवेत्। अथैतन्निष्ठवैधर्म्यमवगत्यएतन्निष्ठवैधर्म्यप्रतियोगित्वेनएतत्प्रतियो
गिकवैधर्म्यमनुमेयंअन्यदितिचेत्तर्हिएतन्निष्ठसादृश्यप्रतियोगित्वेनैतत्प्रतियोगिकसादृश्यस्यतथैवा
५५ नुमेयत्वादितितत्किंनोपमानंप्रमाणांतरंतत्राह। संबंधस्यपरिच्छेदेपसंज्ञायाःसंज्ञिनासह। प्रत्यक्षा
देरसाध्यत्वादुपमानफलंविदुः। उपमानफलंविदुरित्यनयोर्मध्येइतिरध्याहार्यः कीदृशोगवयइतिप्रश्ने
गोसदृशोगवयइत्युत्तरितेपरश्चाद्गोसादृश्यज्ञानेऽतिदेशवाक्यार्थस्मरणात्गवयपदशक्तिरुपमान
फलंसामान्यतोगवयपदंगोसदृशेशक्तमितिज्ञानेपिविशिष्टपूर्वमनुत्पन्नंगवयोगवयपदवाच्यः एता
दृशाविलक्षणविषयताशालिज्ञानंफलंसादृश्यज्ञानंक्वचिद्धर्म्यज्ञानंचकरणमतिदेशवाक्यार्थस्मर
णंव्यापारइतिधिक्करभमतिदीर्घग्रीवंचपलतरोष्ठंकठोरकण्टकाशिनमित्यतिदेशवाक्यार्थस्मरणमि राम.
तिदीर्घग्रीवत्वादिवैधर्म्यज्ञानाज्जायतेततोवैधर्म्यकज्ञानकरणिकाकरभपदवाच्यतोपमितिरितिएव ५५

मुपमानस्यवाच्यतापरिच्छेदकत्ववत्कारणतापरिच्छेदकत्वमपियथामुक्तपर्णसदृशोषधीज्वरंहंती
त्यादौननुगोसादृश्यमेवप्रवृत्तिनिमित्तंतच्चगोतदृशोगवयपदवाच्यइतिवाक्यादेवावगतमितिकि
मुपमानेनएवंयोयत्रासतिवृत्त्यंतरेवृद्धैःप्रयुज्यतेसतस्यवाचकोयथागोशब्दएवंगविप्रयुज्यतेच
गवयशब्दोगोशब्दसदृशेइत्यनुमानेनैवशक्तिग्रहइतिचेन्न।।सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्र
तीतितः।समयोदुर्ग्रहःपूर्वंशब्देनानुमयापिवा।।निमित्तंप्रवृत्तिनिमित्तंनहिसादृश्यंगवयपदशक्यताव
च्छेदकंगवात्तानेथानयनादिनागवयेशक्तिग्रहेणाव्यवहारदर्शनान्नगोसदृशत्वंगवयत्वंत्वयमपिप्र
वृत्तिनिमित्तमस्त्वितिचेन्नलाघवेनगव—त्वस्यैवतथात्वात् तथाचनिमित्तस्यगवयत्वादेःपूर्वमग्रहाद
नुमानेनशब्देनवाशंकितोदुर्ग्रहइति।ननुगवयेस्वज्ञानोत्तरंगोसदृशोगवयशब्दवाच्यइतिवाक्यात्ग
वयत्वाक्षणिकादेवगवयोगवयपदवाच्यइतिबोधोपपत्तेःनतस्यप्रमाणांतरत्वमितिचेत्।।अत्राह

याद्नाकांक्षं न वाक्यं स्यान्यदिच्छति। पदार्थान्वयवैधर्म्यात्तदाक्षिप्ते न संगतिः। गोसादृश्यं किं शक्यतावुप
लक्षणं विशेषणं वा इति पूर्वं संशयेपि यो गोसदृशः गवयपदवाच्य इति सामानाधिकरण्यरूपयथाश्रुत
45 पदार्थान्वयेनोपपत्तेः पश्चाल्लक्षणा न कल्प्यते अन्यदित्यनेन लक्षणा। येनान्वयवोधं जनयतीति ने
त्यर्थः यत्र पदार्थस्य मुख्यार्थस्य वैधुर्यं तदनुपपत्तिस्तत्राक्षिप्ते न लक्षणेति येन वेति इति। न च सादृश्यवै
धर्म्यज्ञानयोर्व्यभिचारात् कथं कारणत्वं अगृहीतशक्तिकपदसमभिव्याहृतवाक्यार्थज्ञानत्वेनैव कारण
त्वात्। स च वाक्यार्थः क्वचित्सादृश्यं क्वचिद्वैधर्म्यं अधिककरभमित्यादौ। वस्तुतः सादृश्यवैधर्म्यज्ञानयो
स्तदुपमारोपमितौ कारणता उभयसाधारणमुपमानलक्षणं तु उपमितिकरणत्वं उपमितित्वं च उपमिनो
मीत्यनुव्यवसायसिद्धमिति तस्मादुपमानस्य नेश्वरे वाधकत्वं शक्तिमात्रग्राहकत्वान्नातिरेकादिति। राम·
शब्दोपि न वाधकः अनुमानानतिरेकादिति वैशेषिकादयः। न चानुमानेनैव वाधकोस्त्वनुमानस्यैवा ७५

पितुप्रथमाप्रवाक्याद्दृक्तज्ञानानुमानपूर्वकमर्थं तथात्वमनुसंधाय तन्निश्चयः अनुमानं चेदं वाक्यं प्रमादि वि
शिष्टज्ञानान्यतरजन्यं वाक्यत्वात् ततोऽप्रमादिनिरासे सति विशेषाद्वाक्यार्थानुमानं अयं वक्त्रा प्रयुक्ता वाक्या
र्थयथार्थज्ञानवान्प्रमाजन्यवाक्यप्रयोक्तृत्वादहमिव तत एते पदार्थायोचितसंसर्गवंतः यथार्थज्ञान
विषयत्वात्सदुक्तपदार्थवत् ननु तथापि कथमर्थविशेषसिद्धिः विशेषणव्याप्त्यग्रहादिति चेद्यथायोग्यत्र व
र्ततेसतज्ज्ञानात् तत्सामान्यतो व्याप्तिज्ञाने पाकादौ प्रवृत्तिदर्शनात् पाकविषयकार्यतानुमानं सत्तासा
मान्यतो व्याप्त्यावपि विशेषसिद्धिरिति एवं वक्तुर्वाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्राभिप्रेतयथार्थप
रत्वात् ज्ञानं ततो वेदान्यशब्दादर्थज्ञानमित्यनुवादकः शब्दो व्यक्तज्ञानावच्छेदकतया तदनंतरं स्वातंत्र्येण वा
क्यार्थस्य प्रागेव सिद्धेरित्याहुः। तन्न गौरवे सा यथार्थवाक्यार्थधीपरत्वस्य ज्ञानस्य प्रमानुत्पादकत्वात् वा
क्यार्थनिरूप्यत्वेन प्रथमं ज्ञातुमशक्यत्वाच्च अन्नंच पदज्ञानं करणं पदार्थस्मरणं व्यापारः शाब्दबोधः फलं

नचपदार्थज्ञानमेवकरणमस्तु क्वचित्पदज्ञानस्यतज्ज्ञानस्योपक्षीणत्वादितिवाच्यं घटः कर्मत्वमानयनं कृतिरिति
50 पदजन्यपदार्थोपस्थितौ शाब्दबोधानुदये नपदविशेषजन्यपदार्थोपस्थितेर्हेतुतायां तदुपस्थापकपदत्वेनापि
40 पिहेतुतासिद्धेः पदार्थज्ञानस्यनिर्व्यापारत्वाच्च किंचिद्व्युत्पत्तिकाले प्रयोजकवृद्धवाक्यश्रवणानंतरंप्र
योज्यव्यापारदर्शनादन्वितज्ञानोपपत्त्यर्थमन्वितबोधकत्वं शब्दस्य गृह्यते तेनत्रिर्वाहार्थमर्थोपस्थितेरपि
सहकारिणी कल्प्यत इति नतथा शब्दस्यान्यथासिद्धिरिति पदार्थं प्रत्येमीत्यनुव्यवसायेबोधकाभावाच्चेति
नचतथापि जातावेव पदानां शक्तिरस्तु लाघवाज्जातिशक्तिज्ञानस्य जातिप्रकारके स्मरणे शाब्दबोधे चहे
तुत्वादितिवाच्यं घटत्वशक्तं पदमित्यपेक्षया घटशक्तमितिज्ञानस्य हेतुत्वात्तत्र घटत्वत्व प्रवेशो गौर
वात्समानाकारक शक्तिज्ञानपदार्थस्मरणशाब्दबोधानां कार्यकारणभावाच्चयदि चनादात्म्येनघ राम·
टत्वमेव घटत्वोपाधि शक्तिग्रहे प्रकारस्तादृशशक्तिज्ञानस्य घटइतिशाब्दधीत्वं जन्यतावच्छेदकं सर्वत्रैक ५०

रूपेण शक्तिज्ञानहेतुतायावच्छेदकत्वात् तत्रासमानप्रकारकमपि विशिष्यैव शक्तिज्ञानं हेतुरित्युच्य
ते तदास्तु लाघवाज्ज्ञातिरेव पदार्थ इत्येप्यके। अस्तु तर्हि शब्द एव बाधकः सर्वज्ञे जगत्कर्त्तरि तथाहि
भगवद्गीतायां। प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः। अहंकारविमूढात्मा कर्ताहमिति म
न्यते। अस्यायमर्थः। न पारमार्थिकं चेतनस्य कर्तृत्वमस्ति आभिमानिकं हि तच्च सर्वज्ञस्याभिमानस्त
न्मूलविशेषादर्शनाभावात् इति न सर्वज्ञस्य जगन्निमातृत्वमिति तत्राह। न प्रमाणमनाप्तोक्तिर्नादृष्टे
क्वचिदाप्तता। अदृश्ये दृष्टे सर्वज्ञो न च नित्यागमः क्षमः॥ ॥उपदर्शितागमो यदि नाप्तोक्तस्तर्हि प्रमा
णत्वान्न बाधकः आप्तोक्तश्चेत् तद्योगमप्रणयनहेतुतज्ज्ञानं इन्द्रियलिंगाद्यभावान्नित्यमुपेयं तच्च ए
व सर्वविषयकं जन्यस्येव कारणप्रयुक्तप्रतिनियतविषयभावत्वादिति कथं वा न तत्कर्तृत्वमागमस्य
कर्तृत्वादिति नानुनाय मा पोक्तत्वाद्वेदः प्रमाणं किंतु प्रवाहनित्यत्वादत आह न च नित्येति क्षमः व्य

वस्यापयितुं शक्यः सर्गप्रलययोः साधितत्वेन नित्यप्रवाहासंभवादिति अपि च। नचासौ कश्चिदेकांतः स
त्वस्यापि प्रचेदनात्। निरंजनावचो धार्थो न च सत्त्वपितत्परः॥ असावागमो वेदः एकांततः कर्तृत्वाभा
वमेवाभिधत्ते इति न किं तु कर्तारमपि प्रतिपादयती त्यर्थः साधकस्यापि द्यावाभूमी जनयन्देव एक इति श्रु
तेः अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तत इत्यादेः सत्त्वात्। न च तु प्रकृतेः क्रियमाणानी त्यस्य बाधकत्व
मन्यपरत्वादित्याह निरंजनेति अंजनं लेपो धर्माधर्मौ अव्ययस्य कर्तुरप्यस्य मीश्वरस्य स नास्तीत्येता
वत्पर्यंतं न त्वकर्तृत्वं अत एवोक्तं न च मां तानि कर्माणि निबध्नंति धनंजयेति बंधो धर्माधर्मौ अजनं
विशेषगुणः तथा च विशेषगुणशून्यतया चिंतनार्थमिदमुक्तमित्यन्ये। अस्त्वर्थापत्तिस्तर्हि बाधि
का यद्यसावेवमप्यविष्पन्नोपादेष्यत न स्यासावनुपदिश्य प्रवर्तयितुं न जानातीति सर्वसत्त्वव्याघाता राम·
पातात् अत उपदेशाद एवान्यथानुपपद्यमानस्तथा नस्तथाविधस्याभावमोदासी। न्यंचावेदयतीति ५१

चेन्न। हेत्वभावे फलाभावात् प्रमाण्येसतिन प्रमा। तदभावात् प्रवृत्तिर्न्न कर्मवादेप्ययं विधिः। कारणाभावे
कार्याभाव इति सामान्यव्याप्तौ इच्छायां कारणविशेषप्रमाणाभावे कार्यविशेषप्रमानस्यादित्यर्थः प्र
माभावेऽनिष्टमाह तदभावादिति अस्मदादीनां प्रवृत्तिर्हि इच्छाद्वारा प्रमाजन्या प्रमोत्पादनं विना नेश्वरेण।
त्वाद्यपितु शक्यते न तत्प्रवर्त्तनीय प्रमोत्पादनार्थं तेनोपदेशः कृतः इति भूतावेशादिव प्रवर्त्तयत्विति चेत्प्र
वर्त्तयेदेव यदि तदा फलसिद्धिः स्यात् यागस्य स्वर्गकामकर्त्तव्यतया भूतावेशन्याये प्रवर्त्तनेऽपि फला
सिद्धेः फलकामनाविरहादुपदेशान्यथानुपपत्त्या च गत्यंतरेण प्रवर्त्तनमशक्यमित्यवधारणात्। वेदा
र्थश्रवणस्यापि मोक्षहेतुत्वाद्वेदरूपोपदेशस्यावश्यकत्वाच्च प्रतिपुरुषं भूतावेशादुपदेशस्य लघुत्वा
च्च येषां मते ईश्वरो नास्ति कर्मण एव जगज्जायते एतन्मतेऽपि तुल्यमिदमित्यत आह कर्मवादेऽपीति यद्यस्ति प्र
वृत्तिनिमित्तं प्रतिसंदृष्टं किमुपदेशेन तत एव प्रवृत्तिसिद्धेः नचेत्तथापि किमुपदेशेनादृष्टाभावे तस्मिन्नसत्य प्र

वृत्तेः न चार्थापत्तिरनुमानतो भिद्यते यद्येसावमविष्यदित्यनुमानं न प्रवर्त्तते पक्षाज्ञानादिति प्रमाणान्तरमे
५२ व सा भवत्विति चेन्न। अनियम्यस्य स्यनायुक्तिर्नोनियंतोपपादकः। न मानयोर्विरोधोऽस्ति प्रसिद्धे चाप्यसो
समः। अनियम्यस्याव्याप्यस्य ह्ययुक्तिरयोगात् अनुपपत्तिरितियावत् तथा चाव्याप्यस्य तं विनानानु
पपत्तिर्नास्ति अतोऽनियंताऽव्यापकः नोपपादकः अपितु व्यापकस्तथैवेत्यनुपपत्तौ व्याप्तिरस्त्येवेति
तज्ज्ञानात् कल्पनमनुमानमेवाहेत्यर्थः प्रमाणयोर्विरोधे चाविरोधायार्थापत्त्यार्थान्तरसिद्धिरिति तं
विरोधेन निरस्यति न मानयोरिति एवमंगीकारे धूमादृन्त्यनुमानमपि अर्थापत्तिरेव स्यादित्याह प्रसि
द्धे इति जीवी देवदत्तो गृहे नास्तीत्यत्र जीविनो गृहासत्त्वं बहिः सत्त्वं विनानुपपद्यमानं बहिः सत्त्वं कल्प
यतीत्यर्थापत्तिः प्रमाणमिति सिद्धांतः। जीविनो गृहासत्त्वं बहिः सत्त्वं विनानुपपन्नमित्यत्र यत्र बहिःस राम
त्वाभावस्तत्र जीवित्वे सति गृहासत्त्वाभाव इति व्यतिरेकव्याप्तिरेवानुपपत्तिरेवं यत्र जीवित्वे सति गृहासत्त्वं ५२

तत्रवहिःसत्त्वमित्यन्वयव्याप्तिरपिव्यतिरेकव्याप्तिस्तदानज्ञातेतिचेन्न अनुपपत्तेरज्ञानेत्वन्मतेपिप्रमि
तेरनुपपादकात्व्यतिरेकव्याप्तिःकथंग्राह्येतिचेन्नयन्नयत्रवहिःसत्त्वंतत्रजीवित्वेसतिगृहासत्त्वाभावःयथा
ममपदानवहिःसत्त्वंतदाममजीवित्वेसतिगृहासत्त्वस्याभावइतिप्रत्यक्षसिद्धत्वात्तस्याएवमन्वयव्या
प्तिरपिसुगृहानन्वगृहेदेवदत्ताभावएववहिःसत्त्वंकल्पयतिनचेदमनुमानंवैयधिकरण्यादित्यनुर्था
पत्तिरेवमानमितिचेन्नगृहनिष्ठाभावप्रतियोगित्वस्यदेवदत्तनिष्ठस्यवहिःसत्त्वव्याप्यत्वात् उपस्थि
विताभूमेरालोकत्वात् अत्रसन्निहितसविलक्षणत्वंसाध्यंनतुसवितावैयधिकरण्यात् नचदेवदत्तास
न्निकर्षेकथंतादृशाभावप्रतियोगित्वलिंगकोदेवदत्तधर्मिकःपरामर्शइतिवाच्यंदेवदत्ताद्युपस्थितो
मनसातादृशापरामर्शसंभवात्तादृशोपस्थितेमनोऽसाधारणसहकारित्वेपिनिर्व्यापारत्वेनाप्रमा
णत्वात्गृहेदेवदत्तप्रतियोगिकाभावावगमेवहिःसत्त्वव्याप्त्यादेवदत्तनिष्ठगृहनिष्ठाभावप्रतियोगि

नेतिपक्षविशेषणकपरामर्शादेरनुमितिरित्यन्ये। व्यतिरेकव्याप्तिज्ञानस्य तदभावाभावत्वेनानुमि
तित्वं अन्वयव्याप्तिज्ञानस्य तत्प्रकारकानुमितित्वं कार्यतावच्छेदकमिति न व्यभिचारः। यद्यपि ह्रदो
53 भाववान्नित्यनुमितिर्वन्ह्यभाववन्निष्ठधूमाभावनिरूपितान्वयव्याप्तिज्ञानात् धूमव्यापकवन्ह्य
भावत्वज्ञानाच्चेति व्यभिचारस्तथापि व्यतिरेकव्याप्तिज्ञानात् विशेष्यविशेषणमिति न्याये नैवं इति।
अन्वयव्यतिरेकव्याप्तिज्ञानयोस्तदुत्तरानुमितौ हेतुता न चैवं व्यतिरेकव्याप्तिज्ञानजन्यफलस्यानु
मितित्वे मानाभावस्तत्त्वार्थापत्तिरूपमानान्तरकल्पने ऽर्थापत्त्यनुमानयोः समाहारे फलानुपाद्य
यपरस्परप्रतिवंधकत्वकल्पने गौरवादित्यपरे। ननु जीवी क्वचिदस्तीत्यनेन गृहस्यापि विषयत्वा
त् पश्चाद्गृहे नास्तीत्यनयोः गृहे ऽस्ति नास्तीत्यत्रेव विरोधज्ञानं कारणं क्वचिदित्यस्य गेहातिरिक्तवि राम
षयकत्वकल्पनया विरोधोपपादकं न चात्रानुमानसंभवतीति चेत्मानयोरविरोधात्तेनत्यत्रमा ५२

नयोर्वास्तवविरोधोस्तितथासतिरज्जुपंसर्पवत्तेकबाधएवस्यात्नतुविषयभेदेनोपपत्तिःनापिविरोधि
त्वेनज्ञानंतर्हितत्रक्वचिदस्तीतिग्रहातिरिक्तविषयतयोपपादयतिग्रहसत्वस्यविरोध्यन्नतत्रवह्निःसत्वमि
त्याकारंसचव्याप्तिरेवद्रूतिघटकुड्यात्रभातमितिनमानयोर्विरोधदृष्ट्यस्यभावःकिंचप्रसिद्धेचाप्यसोसमस्त
याहि यथाधूमात्पर्वतेवह्निःसेत्स्यतितथापुरोभागेऽनुपलब्धेर्वन्ह्यभावोपितथाचानुपलब्ध्यनुमानयो
र्विरोधज्ञानमेवपरभागेवन्हिज्ञानंजनयेत् ननुधूमाद्वह्निनाभाव्यमित्यनेनानुपलब्धेर्विरोधस्तद्यदि
धूमोवन्ह्यनुमापकःस्यान्नान्यथातथाचसिद्धमनुमानंदेशभेदेनतयोरविरोधोपपादनंतु अर्थापत्ति
फलमेवेतिचेधूमेव्याप्तिग्राहकमानेनाविरोधिस्योक्तत्वात्।यद्यपिसामान्यग्राहकमानस्यविशेषतोऽ
नुपलब्धिरबाधिकातदाक्वचिदस्तीत्यस्यापिएहेनास्तीत्यनेनसहनविरोधइत्यवधेयं।एवंपांडरधूमे
नपलात्तवह्निज्ञानमप्यर्थापत्तिरेवस्यात्उपलालवन्हिंविनापांडरधूमानुसत्तेःअनुपलब्धिस्तुनबाधि

कास्वरूपतः परमात्मनोऽयोग्यत्वादित्युक्तमिदानींसाप्रत्यक्षान्नातिरिच्यते इत्यप्युच्यते ॥ प्रतिपत्तेरपा
५४ रोक्षादिन्द्रियस्यानुपक्षयात् । अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः ॥ अभावप्रतीतेरपारोक्षात् अपरो
क्षज्ञानत्वात्तत्रेंद्रियस्यानुपक्षयात् अनन्यथासिद्धत्वादनन्यथासिद्धेंद्रियव्यापारजन्यत्वादित्यावत्
54 अज्ञातकरणकत्वात् इंद्रियकरणकत्वसिद्धेरितिशेषः तथाच बुद्धिरिंद्रियजन्या अज्ञातकरणकज्ञान
त्वात् ज्ञानाकरणकज्ञानत्वाद्रूपप्रत्यक्षवदित्यर्थः । भावावेशादितिअस्मदादिमानसज्ञानभिन्ना
नुभवत्वस्य भावभूतकरणसहकृतमनोजन्यत्वव्याप्तत्वेनाभावबुद्धौ भावरूपकरणसिद्धिः यद्य
प्यपरोक्षज्ञानत्वेनेंद्रियजन्यत्वसाधने मनोजन्यत्वेन सिद्धसाधनं नचेदिन्द्रियत्वेन जनकत्वं साक्षात्कार
प्रतीतिसाधनस्य त्वस्यतत्वात् रूपांतरस्य च शब्देतरोद्भूतगुणानाश्रयत्वादेर्गौरवेनावच्छेदकत्वाच्च त राम·
थापि रूपाभावादिप्रतीतेर्बहिरिंद्रियांतराजन्यबहिर्विषयेकविषयजन्यसाक्षात्कारत्वेन चाक्षुषत्वम ५४

नुमेयं आद्यवहिः पदं मनोजन्यत्वेन स्वरूपासिद्धेर्वारणाय द्वितीयं तु सुखसाक्षात्कारे व्यभिचारवारणाय
विषयजन्येति मानसालौकिकव्यभिचारस्य वारणाय अत्रेदं बोध्यं सर्वत्र नानुपलब्धिर्ज्ञातताकारणं तद
नुपलब्धिज्ञाने ऽनुपलब्धिज्ञानान्तरस्य हेतुतापत्त्यावनवस्थापत्तेः किंतु स्वरूपसती तथा चाज्ञातकरणको
नुभवत्वेन इंद्रियजन्यत्वमेव ननु गृहाद्विनिर्गतो मैत्रः केनचित्पृष्टस्तत्र चैत्र आसीदिति तत्क्षणे ध्यात्वाव
दति नासीत्तत्र चैत्र इति सेयं प्राङ्नास्तिताधीर्न स्मृतिः पूर्वं गेहज्ञानकाले चैत्रास्मरणेन तदनुभावाभावा
दिन्यनुपलब्धिरेव मानं अधिकरणेन्द्रियसन्निकर्षाभावेनेन्द्रियाजन्यत्वात् इति चेन्नाधिकरणासन्निकर्षे
णयोग्यानुपलब्धेः स्वरूपसत्त्वाभावात् ज्ञाततायाः प्रयोजकत्वे ऽनवस्थानात् तस्मादस्मरणेनाभावानु
मानं। यद्यस्मरणं नाभावव्याप्यं तथापि विषयविशेषस्थले तत्तुल्यपदार्थान्तरस्मरणकाले तस्य स्मरणं
भवत्येव यथा वाराणस्यां विश्वनाथाय तने विश्वनाथानुभवोत्तरं तत्सहचरितापरपदार्थस्मरणे तस्यापि

55 स्मरणं प्रयोगश्च तर्कोऽहं तदा चैत्राभाववत् तत्तुल्यपरिमाणापदादिस्मरणेऽपि तद्वृत्तरास्मर्यमाणत्वात् य
देवं तदेव यथा घटाभाववद्भूतलमिति स्मरणाभावः संयुक्तविशेषणतया मनोवेद्य एव इति नन्विंद्रिय
स्यानन्यथासिद्धत्वं यदुक्तं तदेव अधिकरणज्ञानेनैव तस्यान्यथासिद्धिरिति चेन्न अन्धस्यापि त्वचा घटा
ग्रहे रक्तरूपाभावग्रहप्रसंगात् अधिकरणज्ञानानुपलब्ध्योः सत्वादिति मम तु प्रतियोगिग्राहकेंद्रि
यस्याभावग्रहहेतुत्वात् न तस्य दोष इति नच ममापि प्रतियोगिग्राहकेंद्रियजन्याधिकरणज्ञानं हेतुस्तथा
सति तत्र वायौ त्वगिंद्रियोपनीते रूपाभावधीर्न स्यात् नच वायौ रूपाभावधीरनुपलंभलिंगजा तत्र येज्ञा
नस्यायोग्यत्वेनानुपलब्धेरप्यग्रहात् एवं वायोर्नीतत्वाभावोऽपि रूपाभावेन समानस्तस्मात्तत्रानन्यथा
द्धित्वात् सन्निकर्षादेवाभावधीरित्यत्रापि तथा प्रतियोगितद्व्याप्येतरयावदुपलंभकावच्छिन्नानुपल- राम·
ब्धिः कारणमित्यवच्छेदकतया सन्निकर्षापेक्षेति चेन्न अनुपलब्ध्यवच्छिन्नेंद्रियस्य हेतुत्वमित्यस्य मु ५५

वचत्वात् विनिगमनाविरहात् तथाचान्वयव्यतिरेकाभ्यां रूपग्रहइव तदभावग्रहेपि चक्षुः कारणमन्य-
थातत्रापि नस्यात्॥ प्रतियोगिनि सामर्थ्याद्व्यापारव्यवधानतः मोक्षाश्रयत्वाद्दोषाणामिंद्रियाणि विक-
नात्॥ इंद्रियाणीति पक्षनिर्देशः करणमिति साध्यंप्रकरणात्पत्प्रतियोगिग्राहकं यथा लिंगशब्दे तथा
चेदमिंद्रियघटाभावग्राहकं घटग्राहकत्वात् साध्ये ग्राहकत्वं स्वरूपयोग्यता न चोपमाने व्यभिचारस्तस्य
ग्राहकत्वात् यद्वा अभावविषयकालौकिकप्रत्यक्षान्य स्वरूपयोग्यत्वं साध्यं शब्दाविषयकभावग्रहजनकत्वं
हेतुः ननु प्रतियोगिग्राहकत्वमतंत्रं अनन्यथासिद्धत्वस्य तंत्रत्वात् इंद्रियं त्वाश्रयग्रहेणान्यथासिद्धमि-
त्यत आह व्यापारेति अभावप्रमस्य दुष्टकरणत्वादनुपलब्धेश्च स्वतो दुष्टत्वाभावात् पित्तादिनादु-
ष्टमिंद्रियं तत् करणमित्याह दोषेति तथा चेंद्रियमभावप्रमाकारणं तद्भ्रमकरणत्वात् रूपप्रमाकरणचक्षु-
र्वदिति सामान्यतो व्याप्तिः दोषस्याकरणत्वान्न व्यभिचारः न च यथेंद्रियस्यादुष्टत्वं दोषसहितत्वमेव न

56

यानुपलब्धेरपि स्यादिति वाच्यं लिंगाभावजन्यत्वे सांनिद्रियकरणत्वस्य साध्यत्वात्। पूर्वपूर्वयुक्तौ तात्पर्या
द्वा किंचाधिकरणाभावयोर्विशिष्टधीर्नेन्द्रियजन्याऽभावबुद्धित्वात् नानुपलब्धिजन्याभावबुद्धित्वात् नोभय
जन्या जातिसंकरप्रसंगादुभयथाह्येकमिंद्रियं मंतव्यमित्याहविकल्पनादिति इदमापाततः घ्राणेन सौरभ
ग्रहे सुरभिचंदनमिति चाक्षुषवत्, अनुपलब्ध्या अभावग्रहेपि घटाभाववद् भूतलमिति प्रत्यक्षसंभवात् तत्र
सौरभग्रहाय घ्राणस्येवात्रापि अभावग्रहाय अनुपलब्धेः कल्प्यत्वादिति पूर्वयुक्तौ तात्पर्यं ननु विशिष्ट
प्रत्यक्षस्य निर्विकल्पकजन्यत्वनियमो न चाभावे सविकल्पकमात्रावद्यो तत् संभवः अतोनाभावज्ञानं
प्रत्यक्षं अनुपलब्धिजन्याभावज्ञानस्याप्रत्यक्षत्वात् न तज्जन्यत्वं तद्विषयशब्दादिज्ञानस्यैव किंचा
भावेन सममिंद्रियस्य संयोगसमवायादेः प्रत्यासत्तेरभावादप्रत्यासन्नस्याजनकत्वान्नाभावज्ञान राम.
मिंद्रियजन्यमिति चेन्न। अवच्छेदकसंबंधो व्याप्यो व्येसिद्धसाधनात्। प्राप्यंतेऽनवस्था नानाचेदन्योपि ५६

दुर्घट ॥ अवच्छेदेति विशेष्यत्वं प्रतियोग्यादिविशिष्टप्रत्यक्षविषयत्वेन निर्विकल्पकविषयत्वे साध्ये विशेषणज्ञा
नानियतसामग्रीकज्ञानविषयत्वमुपाधिरित्यर्थः ॥ ध्रौव्यं नियमः अभावज्ञाने प्रतियोगिज्ञानस्य हेतुत्वादभाव
बुद्धेः प्रतियोगिप्रकारिकैव इति न निर्विकल्पकविषयोऽभाव इति अभ्युपेत्याह ॥ ध्रौव्यमिति यद्यभावज्ञाने प्र
तियोगिज्ञानं न हेतुस्तदाभावोऽपि निर्विकल्पकविषयो भवत्वेवेति सिद्धसाधनमित्यर्थः अभावस्य संबंधांतरं वि
ना स्वरूपेणैव विशेषणं संबंधान्तरसत्वे तत्रापि तत्कल्पनादनवस्थापत्तेरित्याह प्राप्त्यंतर इति संबंधांतरस्वीका
र इत्यर्थः ॥ यदि च नैवं तदा न त्वन्मतेऽप्युपपत्तिरित्याह न चेदिति त्वन्मतेऽपि प्रतियोगिज्ञानमनुपलब्धेः सहका
रि अन्यथानुपलब्ध्याप्यभावनिर्विकल्पकजननप्रसंगात्तत्रेष्टापत्तावस्माकमिन्द्रियेपि तुल्यं त्वन्नयेप्यभा
वसंबंधसंबंधादिस्वीकारेऽनवस्थेति स्वरूपमेव संबंधो वाच्यः यदि यावद्दूरं प्रतीतिरस्ति तावद्दूरं संबंधसं
बंधाः स्वीक्रियंत एव संबंधसहस्रस्यापि केनाप्यननुभवान्न तत्स्वीकारः अन्यथा स्वरूपसंबंधेनोपपत्तौ स

मवायापिनसिध्येत्लाघवात्तत्रसमवायःसिद्धइतिचेत्तुल्यंविशेषणतायामपीत्युच्यतेतद्धापिनक्षतिरस्मा

57 [illegible]रप्यतिरिक्तविशेषणतास्वीकारादिति नन्वभावस्यप्रत्यक्षेलौकिकेवानप्रतियोगिज्ञानंहेतुर्न्नायनेसा

मान्यलक्षणादिजन्येइदंत्वादिनाप्रत्यक्षेव्यभिचारात्प्रतियोगिविशेषिताभावप्रत्यक्षेतद्धेतुरितिचेन्नतत्रवि

शिष्टवैशिष्ट्यबोधेविशेषणतावच्छेदकप्रकारकज्ञानत्वेनैवहेतुत्वादितिचेन्नैवंअभावत्वप्रकारकघटा

भावादिविषयकप्रत्यक्षेघटत्वेनघटज्ञानस्यहेतुत्वात् अन्यथासंनिकर्षसत्वात्प्रतियोग्यभानेपिशुद्धमभा

वइतिप्रत्यक्षंस्यात् नचेदमानुभाविकं इंद्रियसंबंधविशेषणतायाघटोनास्तीतिप्रत्यक्षंकार्यतावच्छेदकमि

तिचेत्तर्हितवापिप्रत्यभावेसंनिकर्षस्यइवममापितत्रप्रतियोगिज्ञानस्यकारणत्वकल्पनमितिचेन्नसामा

न्यतोऽभावचाक्षुषत्वेनचक्षुःसंबंधविशेषणतात्वेनतथात्वकल्पनात् तथापीदमेवाधिकमितिचेन्न राम

वेंद्रियसंबंधविशेषणतायाघटोनास्तीतिप्रत्यक्षेहेतुत्वादिदंत्वेनाभावप्रत्यक्षंनस्यात् एतदनुरोधेनप्र ५७

स्यभावमिदं त्यादिप्रकारकप्रत्यक्षापित्तथा हेतुत्वस्यकल्पत्वादि। तद्गौरवमधिकं एवं घटो नास्तीति प्रत्यक्षद्
याभावप्रयोगा घट इत्यादि प्रत्यक्षेष्वपि कारणत्वात्तरकल्पनमिति महागौरवं नचैवं घटज्ञानं विनापि घटाभा
वत्वभ्रमात् घटज्ञानस्याभावप्रत्यक्षे हेतुत्वे व्यभिचारः तत्र घटाभावस्यैवारोपस्त्वात् कारणं विना कार्यानु
त्पादात्। नचयत्रान्यदीयभावे प्रमेयत्वं नास्तीति धीः तत्र प्रतियोगिज्ञानहेतुतायां व्यभिचारः प्रमेयत्वाभा
या प्रसिद्ध्या तस्यारोप इत्यस्यापि वक्तुमशक्यत्वादिति वाच्यं प्रमेयत्वस्यातीन्द्रियत्वेन तत्प्रतियोगिकत्वेनाभा
वप्रत्यक्षस्यानुत्पत्तेः विषयतासंबंधेन स्वप्रमाप्रतियोगित्वेनापि नाभावप्रत्यक्षमतः स्वप्रमेव प्रमेयत्वमि
त्युक्तेपि न निस्तारः आकाशाभावादेः स्वप्रमेयत्वप्रतियोगिकत्वभ्रमः आकाशाभावप्रत्यक्षे आकाशज्ञा
नस्य कारणत्वाकल्पनेन तत्र दोषाभावादिति। अथवा यत्र यज्ज्ञानं तिष्ठति तत्र क्वचिद्दोषात्तदभावे व्याभा
वत्वभ्रमः नच घटात्यन्ताभावस्य घटध्वंसादिप्रतियोगिकत्वात्तज्ज्ञानं विनापि घटो नास्तीति प्रत्यक्षाद्व्यभि

चारः तदभावप्रतियोगितानवच्छेदकताश्रयस्य तद्विशिष्टाभावत्वेन तदभावप्रत्यक्षे हेतुत्वात्। एतेन समनिय
ताभावे केन तत्र व्यभिचारो निरस्तः नचैवं घटाभावे कंबुग्रीवादिमान्नास्तीति धीः। तत्र कंबुग्रीवादिमत्व
स्य प्रतियोगितानवच्छेदकत्वात् अन्यथा तत्रापि पूर्वरीत्याऽनेककार्यकारणभावप्रसंगात् अस्तु वा प्रति
योगितासंबंधेन घटाप्रकारकं यत् प्रतियोगितासंबंधेन किंचित्प्रकारकं तद्भिन्नघटाभावविषयकप्रत्य
क्षे घटज्ञानं हेतुः एतादृशं च शुद्धमभावज्ञानं घटो नास्तीति ज्ञानं च शुद्धं तु न जायते घटज्ञानाभावादिति ज्ञाने
सति घटाभाववद्भूतलमिति ज्ञानं माजनि इष्टप्रतियोगिज्ञानसत्वात् शुद्धाभावप्रत्यक्षं तु स्यादेव एवमभा
वे यत्र घटप्रतियोगिकत्वा(बाधोग्रहः) तस्तत्रापीति चेन्न तत्र घटाभाववद्भूयामिति ज्ञानस्योत्पत्तेः एवं प्रति
योगितासंबंधेन बाधग्रहेपि प्रतियोगितासंबंधावच्छिन्नाया प्रतियोगिताया अभावे घटस्य प्रकारतया राम-
भाने बाधकाभावात् नहि संयोगेन घटाभावभाने भूतले संयोगावच्छिन्नप्रतियोगितासंबंधेन प्रतियोगि ५८

विशेषणिकानाभावधीरिति एवमुपर्युपरि बोध्यं। न च घटवद्भूतलमिति ज्ञानेपि द्रव्यत्वधर्मितावच्
छेदकतया भानमर्हतीति न द्रव्यमभाववदिति ज्ञानं जायत इति यदुक्तं तदसंगतमिति वाच्यं उपस्थि
तानां यावतां सर्वज्ञाने धर्मितावच्छेदकतया भाने मानाप्रकारकत्वे प्रतिबंधकत्वविलोपप्रसंगात् तर्हि इदं र
जतमिति ज्ञानेपि द्रव्यनवजातमिति प्रत्यक्षानुपपत्त्या कल्प्यते तत्र च भवदनुयोगस्यानुद्धारात् न चैवं
घटाभाववद्भूतलमिति माल्सुशुद्धमभावप्रत्यक्षमपि तथा किंत्वभाववद्भूतलमिति स्यादिति वाच्यं अ
भाववद्भूतलमिति प्रत्यक्षत्वस्यापि कार्यतानवच्छेदकत्वात् न च घटाभाववद्भूतलमित्यपि न स्यात् तत्र
तदिंद्रियजो संसर्गग्रहाभावस्य नियमकत्वात् तद्ग्रहतुनाह शफलाभावेन तथाकल्पनादिति। इदं चापरं बो
ध्यं इंद्रियत्वस्य गुरुतया कारणतानवच्छेदकत्वेन चक्षुःसंबंधविशेषणतया घटो नास्तीति चाक्षुषत्वं त्वक्
संबंधविशेषणतया घटो नास्तीति त्वाचत्वं तथा च प्रतियोगिशते कार्यकारणभावशतं इदं अस्माकं तु

59

ज्ञातप्रतियोगिज्ञानानां नांग्रहतकार्यकारणभावाः सामान्यतश्चक्षुःसंबंधविशेषणतात्वेनाभावश्चाक्षुष
त्वेमत्वकसंबंधविशेषणतात्वेनाभावत्वाच्च त्वेनद्भुतिद्वयमित्यलं पल्लवितेनाप्तत्वकार्यमुपसंहरन्नेवन
तिं निबध्नाति॥ प्रत्यक्षादिभिरेवमेवमधरो दूरे विबोधोदयः प्रपायमसुखरक्षणैकविधुरैरात्मापिना
साध्यते। तं सर्वानुविधेयमेकमस्मत्स्वच्छंदलीलोत्सवं देवानामपि दैवमद्भुतं वदंति श्रद्धाः प्रपद्यामहे।
सस्येश्वरस्यमुखरक्षणैकविधुरैर्दुर्निग्राहकमानबाधितैः प्रत्यक्षादिभिरात्मैवनासाद्यते विबोधोदयः
अधरोऽधः अत एव दूरे सर्वमनुविधेयं वश्यं व्याप्यं यस्य असमाचासौ स्वच्छंदाचतराभयोज्ययालीला
सैवउत्सवोयस्यसः तथा सर्वदुःखाभावसहचारितत्वादिति तृतीयःस्तबकः॥ ॥ननु तथापिनेश्वरज्ञा
नं प्रमा अगृहीतयाथार्थ्यत्वस्य तल्लक्षणस्याभावात् तच्चस्वभावकालीनसमानाधिकरणज्ञानाविषयविष राम·
यकत्वमिति चेदिदं लक्षणं यथार्थत्वेनविरोषितं नथा आद्ये प्रमात्मकधारावहनबुद्धाव्याप्तिरित्याह॥ अथा ५६

तेरधिकव्याप्तेरलक्षणमपूर्वदृक्। यथार्थानुभवो मानमनपेक्षतयेष्यते॥ अपूर्वमगृहीतग्राहि धकदर्शनं।
ज्ञानमिति यावत् भावप्रधानो निर्देशः अगृहीतग्राहित्वं न लक्षणमित्यर्थः प्रमालक्षणमाह यथार्थेति ननु यथा
र्थानुभववत् यथार्थस्मृतिरपि किं प्रमा न स्यात् यथार्थत्वस्यैव तंत्रत्वात् अनुभवत्वस्य व्यर्थत्वात् इत्यत आह
अनपेक्षतयेति स्मृतेर्याथार्थ्ये पि स्वकारणीभूतस्वान्यूनानतिरिक्तविषयकानुभवयाथार्थ्यापेक्षा तस्याः अ
नुभवस्यैवेत्यर्थः। इदं च परिभाषामात्रं स्मृतिकरणे महर्षीणां प्रमाणत्वाव्यवहारेण प्रमालक्षणे ऽनुभव
त्वस्योपात्तत्वात् इति न तु धारावाहिकेनाव्याप्तिः सर्वेषां ज्ञानानां स्वोत्पत्तिक्षणविषयकत्वेनाधिकविषय
त्वादिति चेन्न क्षणानामतींद्रियत्वात् न च मुहूर्त्तत्वादिवदुपनीतः क्षणो भासतां प्रतिज्ञानपूर्वं तत्तत्क्ष
णोपनयस्वीकारे धारावाहिकज्ञानासंभवात् तद्विषयक्षणविषयत्वेनागृहीतग्राहित्वासंभवाच्च अस्म
न्मते ऽमुहूर्त्तादेः प्रथमज्ञाने ऽपनयवशात् ज्ञानेनोत्तरज्ञाने तज्ज्ञानरूपोपनयवशेन भानादिति स्मृतेरप्रमा

60

६० त्वेपूर्वानुभवेकिंमानमितिचेत्ननुभूतेस्मरणाभावेनकार्येणकारणस्यानुभवस्यानुमानात्ययोऽहमन्व
भवंसोऽहंस्मरामितिमानसप्रत्यक्षसत्वाच्चननुकेयंतत्तानतावदतीतानुभवविषयत्वंअनुभवविषयत्वस्या
नुभवाविषयतयास्मृत्यांतदुल्लेखानुपपत्तेःनचपूर्वानुभवानुव्यवसायेनतस्यापिग्रहणात्तस्यापिस्मृ
तिर्यदातुनतथातदाप्रमुष्टतत्ताकाद्यइदंइतिस्मृतिरितिवाच्यंपूर्वानुभवविषयस्यानुमितौभानेसइतिबुद्धे
रभावात्एतेनद्रव्येतत्तद्गुणादिर्व्यभिन्नेतत्तत्प्रत्यक्षविषयत्वादिःसर्वत्रतत्तत्त्वरूपमेववातत्तेतिनिरस्तमि
तिचेन्नयएवहिधर्मोऽनुभवेभासतेसएवस्मृतावपियरेतत्तातत्तद्रूपादिरूपासैवेदन्तादिपरंतुयदातस्यस्म
रणाख्यज्ञानंतदासइतित्यपिज्ञापोयदाचानुभवाख्यंतदायमितितुतत्वंननुकिंचिज्ज्ञानंकिंचिद्विषय
कमेवइतिनियमान्यथानुपपत्त्याविषयनिष्ठाज्ञानजन्याज्ञाततताख्यःकश्चिद्धर्मःस्वीकार्यस्तथाचय राम.
ज्ञानंयत्रज्ञाततताजनकंतत्तद्विषयकमितिनियमोपपत्तिः।नन्वस्तुज्ञाततताख्याविषयनिष्ठधर्मःत ६०

तस्य ज्ञानजन्यत्वं मास्तु ज्ञानजनकचक्षुरादिना ऽसौ जन्यतां तज्जनकचक्षुरादिजन्यज्ञाततावत्त्वमेव तद्
द्विषयत्वमास्तामिति चेन्न ज्ञाततायाऽपादानज्ञानाजन्यत्वे क्षित्यादेरुपादानप्रत्यक्षजन्यत्वसाधकं कार्य
त्वं तत्रैव व्यभिचारि स्यादिति नैयायिकानामीदृशशंकाऽयोगादिति चेन्न ॥ अभावनियमाभावादुपकारो
पि दुर्घटः। स्वघटत्वेपि सत्यर्थे ऽसति कार्गतिरन्यथा ॥ ज्ञानेन ज्ञानविषयतारूपज्ञातताजननेपि स्वरूपमे
व संबंधो वाच्यो ऽन्यथा क्वचिदेव साक्षात्तेति नियमो न स्यात् तथा च तत एवाविषयानियमोपपत्तौ किं ज्ञा
ततये त्याह स्वभावेत्यादि उपकारो ज्ञातता विद्यमानेर्थे ज्ञानजन्यज्ञाततोत्पत्तिसंभवेप्यतीतानागतार्थे तदसंभ
वात् यथा तत्र स्वभाव एवाविषयत्वनियामकः तथा विद्यमानेप्यर्थे ऽस्त्वित्याह स्वघटत्वेपीति सति विद्यमाने
असत्यविद्यमाने ऽतीतघटे सघट इति ज्ञानेन घटस्यैव ज्ञातताजन्यते इति चेत् तर्हि घटस्य तज्ज्ञानाविषयत्व
प्रसंगात् धर्मधर्मिणोरभेदात् घटत्वविषयत्वेनैव घटविषयतेति चेन्न अंधेन स्पर्शग्रहाद्रूपग्रहणप्रसंगात् तस्य

61

ज्ञानरूपं च गम्यते रूपत्वं तु न गम्यते इति चेत्तर्हि तद्वद्धर्म्यैव धर्मधर्मिभेदस्वीकारात्। भेदाभेदौ स्त इति चेन्न वि
रोधात् न तु भवान्ननीलो घट इत्यादौ नीलरूपवति लक्षणा अतः। तदंडप्रकारके दंडीति ज्ञाने तथात्वानुपप
त्तेः नहि नैदंडपुरुषयोरैक्यं शंकास्पदमपि तथ्येयं॥ ननु धात्वर्थतावच्छेदकपरसमवेतक्रियाजन्यफल
शालित्वं घटं जानामीत्यत्र घटादेः कर्मत्वमिति ज्ञानक्रिययोः कर्मनिष्ठफलजनकत्वात् ज्ञाततातोसेत्स्य
तीति चेन्न॥ अनैकांतादसिद्धेर्वा न च लिंगमिह क्रिया। तद्धि शिष्यप्रकाशत्वान्नाध्यक्षानुभवाधिके॥
यदि क्रिया धात्वर्थमात्रं तर्हि शरीरं गगणं संयुनक्तीत्यादौ संयोगादिरूपधात्वर्थे न गगणे तज्जननाद
नैकांत इत्याहानैकांतादिति अन्यस्य शब्दाभिधेयत्वावाच्यपरिहारः नवास्य शब्दाभिव्यक्तावस्य शब्दे ज्ञानते
वोत्पद्यते तदृत्तिवाच्यं तस्याव्यवहितकाले एव नाशात् समवायिकारणस्य कार्यसमकालनियमात् राम·
शब्दनित्यत्वस्य च निषेधादिति भावः यदि क्रियास्यंदः तदास्य दृत्वस्य ज्ञाने सिद्धिरित्याहासिद्धेर्वेति। ६१

नाभिमतादिच्छादेरुत्पत्तिसंभवात् ज्ञान एव प्रमाणं न स्यात् तस्मात् प्रत्यक्षमेव ज्ञाने प्रमाणं। तथा च स्वतंत्रं ज्ञा
नविकल्पानां भावाभावसंवेदनाद्ध्यात्मम् इति ज्ञानविकल्पानां ज्ञानभेदानां प्रत्यक्षादीनां भावाभावौ अस्ति
ज्ञानं नास्ति प्रत्यक्षं ज्ञानमित्यादिना कारणात्मना मनसैव संविद्यते इत्यर्थः ज्ञानं प्रत्यक्षं आशुविनाश्यात्मगु
णत्वात् सुखवत् ज्ञानयोनियमसत्त्वे मानाभावात् प्रत्यक्षवृत्तिगुणत्वव्याप्यजातिमत्त्वं वा साध्यं तेन तत्र
नव्यभिचार इत्यवधेयं। न त्वीश्वरज्ञानं न प्रमा प्रमाणफलस्य तत्त्वात् अत एव नेश्वरः प्रमाता इति चेन्न।। मितिः
सम्यक् परिच्छित्तिस्तद्वत्ता च प्रमातृता। तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते। सम्यगिति यथानुभवत्व
मेव प्रमात्वं न तु जन्यत्वघटितं गौरवात्। नित्यज्ञानासिद्धेर्व्याहृत्यसिद्धेश्च तच्चेश्वरज्ञानेऽप्यस्ति एवं ता
दृश प्रमाश्रयत्वलक्षणा प्रमातृता ईश्वरेऽप्यस्ति इत्यर्थः। नन्वेवं मंत्रायुर्वेदवत् प्रामाण्यमाप्तप्रामाण्या
दिति न्यायसूत्रविरोधः अत्र हि आप्तप्रामाण्यादित्यनेन ईश्वरस्य प्रमाणत्वं तत्त्वया च प्रमावत्त्वमेवोक्त

मतआह तद्योग इति तथा च प्रमायोगव्यवच्छेदत्वलक्षणं प्रामाण्यं ईश्वरस्य चेति न चैवमीश्वरज्ञा
63 नस्य कुत्र प्रमायामन्तर्भावः साक्षात्कारिप्रमात्वेन प्रत्यक्षमध्ये निवेशात् प्रमाजन्यत्वं च जनकत्वाश्रयत्वा
न्यतरसंबन्धेन इति न चैवमीश्वरस्यानस्य भ्रमत्वापत्तिः व्यवसायनिष्ठरजतत्वाभाववद्विशेष्यकत्वरजतप्र
कारकत्वादेरनुव्यवसायेनावगाहनेपि व्यधिकरण्याप्रकारकत्वात् शिवस्तुतिव्याजेन स्ववकार्यमुपसंहरति
॥ साक्षात्कारिणि नित्ययोगिनि द्वारानपेक्षस्थितौ भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ॥ नेशा
दृष्टिनिमित्तदृष्टिविगमप्रभ्रष्टशंकातुषः शंकान्मेषकलंकिभिः किमपरैस्तन्मे प्रमाणं शिवः॥ भूतार्था
नुभवे यथार्थानुभवे साक्षात्कारिणि प्रत्यक्षे निविष्टो विषयी भूतः प्रस्ताविवस्तूनां नानापदार्थानां क्र
मो यस्य स तथा सानुभवविषयक सकलपदार्थ इत्यर्थः नित्ययोगिनि सदा संबद्धे तत एव परेषामिन्द्रिया राम.
दीनां द्वाराणामनपेक्षा स्थितिर्यस्य नेशाख्यल्पायाअदृष्टिविशेषादर्शने तन्निमित्ता दृष्टिरागद्वेषादिस्तद्द ६२

गमात् प्रभ्रष्टः शंकातु षोवेदप्रामाण्यशंकानेशोयस्मादित्यर्थः शंकोन्मेष एवाप्रामाण्यशंकाप्रादुर्भाव एव।
फलंकेयेषांचोद्भावितैः किं॥ ॥इति चतुर्थस्तवकः॥ ॥ईश्वरसाधकमेव नास्तीति दूष्यति॥ कार्यायोजन
धृत्यादेः पदात्प्रत्ययतः श्रुतेः। वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥ नस्वयंस्थाणोरपराधोयदे
नमंधो न पश्यतितथाहि परमाण्वादिकं अपरोक्षज्ञानचिकीर्षाविषयः कार्यात्। कपालवत् हेतुनासमवाये
नाक्षितिः सकर्तृका कार्यत्वाद्घटवदित्यनुमानादिनेश्वरसिद्धिः आयोजनं परमाणुकर्म तथाच सर्गाद्यकाली
नं द्व्यणुकारंभकपरमाणुकर्म प्रयत्नजन्यं अप्रयत्नवदात्मसंयोगजन्यं वा कर्मत्वादस्मदादिशरीरकर्मवत्। धृति
गुरुत्ववतां पतनाभावः पतनप्रतिबंधकसंयोगो वा ब्रह्मांडादि प्रयत्नप्रतिरुद्धपतनकं धृतिमत्वात् वियती
विहंगमशरीरवत् विहंगमशरीरे धृतेः प्रयत्नवदात्मसंयोगेन प्रतिबंधात्तच्छरीरं न पततीति भावः। आ
दिपदान्नाशपरिग्रहः ब्रह्मांडनाशः प्रयत्नजन्यः नाशत्वात् पाट्यमानपटनाशवत् पदात् पद्यते व्य

स्यघते ऽनेनेति व्युत्पत्त्या पदं व्यवहारः तथाच घटादिव्यवहारः स्वतंत्रपुरुषप्रयोज्यः व्यवहारत्वात्
आधुनिकनिर्मितलिप्यादिव्यवहारवत् प्रत्ययतः प्रत्ययः प्रामाण्यं तस्माद्वेदजन्यप्रमा वक्तृयथार्थवा
64 क्यार्थज्ञानजन्या शाब्दप्रमात्वात् लौकिकवाक्यजन्यशाब्दप्रमावत् श्रुतेर्वेदाद्वेदः सर्वज्ञप्रणितः वेदत्वा
त् इति व्यतिरेकि तथाचाक्यत्वादिस्यन्वयि तथाच यद्यपि परेषां सर्वज्ञो सिद्धस्तथापि आत्मत्वमसंसारिवृत्ति
जातित्वाघटत्ववत् आत्मत्वाश्रयोऽसंसारी वेदप्रणेतृपुरुषत्वादिति साध्यप्रसिद्धाव संसारिपुरुषप्रणी
णीत इति साध्यमिति प्रकाशः अत्रापि पौरुषेयत्वं साध्यं तच्च सजातीयोच्चारणकर्मजातीयत्वं ननु सर्वज्ञप्र
णीतत्वं वाक्यादिस्यपौरुषेयत्वमन्वयि नासाध्यं अत्र तु दृष्टांताभावात् व्यतिरेकिनेत्यन्येति भेद इत्यन्ये वा
क्याद्याक्यत्वाद्वेदः पौरुषेयो वाक्यत्वाद्भारतवदित्यर्थः संख्याविशेषः परिमाणे द्वित्वं द्व्यणुकपरिमाणं राम·
संख्याजन्यं परिमाणप्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयारब्धघटप ६४

परिमाणात्प्रकृष्टतादृशकपालतयारब्धघटपरिमाणवत् अणुपरिमाणं च न परिमाणजनकं नित्यपरिमा-
णत्वात् अणुपरिमाणत्वाद्वा एवं च सर्गाद्यौ घ्यणुकपरिमाणहेतुसंख्या नास्मदादिबुद्धिजन्या यद्बुद्धिजन्या
स एवेश्वरः जन्यानुभवसमानार्थर्थपच्छाब्दवाक्यार्थज्ञानमुपजीवितत्वं अन्यथा शब्दोपजीवित्वपरे साक्षा-
त्परंपरासाधारणशाब्दधीप्रयोज्यत्वविवक्षणे द्विपरश्रुरुत्तममित्यादिवाक्यार्थज्ञानजन्यप्रसिद्धस्यादि
मूलकादृष्टजन्यप्रमितिविषयैकार्थकलौकिकवाक्याति व्याप्तेरपरिहारात् वेदार्थस्यापिता दृशप्रमाणा-
तिरिक्तात्मानुद्विजन्यानुमित्यादिविषयत्वात्समवधारणाय द्वितीये प्रमाणपदस्यासाधारणप्रमा-
णपरत्वावश्यकत्वात् आत्ममनःप्रभृतिनित्यप्रमाणवर्गजन्यचाक्षुषादिप्रमितिविषयार्थत्वस्याकिं-
चित्करत्वात्तन्न च चक्षुर्व्याप्रियमाणं अनुभवजनना[र्थं] किंचिद्वाक्यार्थानमपेक्षते यपि स्वर्गादिष्टद्वाका
स्वर्गीर्वाहार्थमपेक्षते तु शब्दोपजीवि प्रमाणं स्वर्गो यागजन्यः यागजन्यतया वेदबोधित्वादित्यादि

वेदार्थगोचरमनुमानं अनुभवजननार्थमपि साध्यप्रसिद्ध्यादिविषयावेदकन्यायशाब्दज्ञानं न च शाब्दज्ञानस्या
६५ दिष्टद्वाराचक्षुराद्युत्पत्तिप्रयोजकत्वे चक्षुरादिजन्यानुभवसामान्यं प्रत्यपि चक्षुराद्युत्पत्तिद्वारा प्रयो
65 जकत्वमिति वाच्यं अदृष्टाद्वारकशाब्दज्ञानप्रयोज्यत्वस्यैव शाब्दोपजीविपदार्थत्वात् न च याव्यक्तिर
नुभवजननार्थं शाब्दगोचरज्ञानं नियमतदुपजीवति तत्वमेव तदस्तु किं शाब्दवाक्यार्थज्ञानपर्यंतनिवेशेने
ति वाच्यं प्रत्यक्षेण चैत्रशब्दं श्रुत्वा चैत्रः शब्दायते इत्युक्तवाक्याभिव्याप्तिवारणार्थं तदुपादानात् ताहृश
वाक्यस्य चैत्रपक्षकशब्दानुमानेन गृहीतार्थकत्वे [illegible] शब्दप्रत्यक्षमूलानुमानमात्रगम्यार्थकत्वेनाति
व्याप्तेर्दुर्वारत्वात् यद्यप्येतेन दोषस्ताहृशवाक्यस्यानुभवजननार्थं नियमतः शाब्दवाक्यार्थज्ञानानु
पजीविति रूक्तानुमानरूपप्रमाणविषयार्थकत्वात् न चैवमपि चैत्रवाक्यादयमर्थो ज्ञात इति लौकि एम·
कवाक्येति व्याप्तिस्ताहृशवाक्यार्थसाधकानुमानानां साक्षात्परम्परया चैत्रशब्दजन्यशाब्दज्ञा ६५

नं विनाऽनुभवजनकत्वासंभवात् तत्र चैत्रशब्दशाब्दज्ञानजन्यशाब्दज्ञानस्य विशेषणतया तज्ज्ञानस्य तस्य
तुल्यात् तज्ज्ञाने साम्यात् परम्परया विषयविधया चैत्रशब्दजन्यशाब्दज्ञानस्यावश्यं प्रयोजकत्वादिति वा
च्यं चैत्रशाब्दजन्यज्ञानं विनापि प्रमाणान्तरजन्ये चैत्रशब्दजन्यत्वभ्रमात्तत्रैव सामान्यलक्षणप्रत्यासत्त्या
चैत्रशब्दजन्यशाब्दज्ञानस्य ज्ञानसंभवेन तदर्थसाधकानुमानस्य निरुक्तशाब्दोपजीवित्वाभावात् यद्य
पि वेदजन्यप्रत्येकपदजन्यप्रत्येकपदार्थस्मृतिसहकारेणानुमानेन वेदार्थस्य प्रमापकत्वात् संभवः तदनु
मानव्यक्तेरनुभवजननेनैवृत्त्या शाब्दज्ञानजन्यज्ञानस्य पदार्थस्मृतेः पदजन्यपदार्थस्मृतिसापेक्षत्वेपि शाब्द
ज्ञानासापेक्षत्वात् वृत्त्या शाब्दज्ञानजन्यज्ञानसापेक्षत्वस्य शाब्दोपजीवितावघटकत्वेपि पृथक् शाब्दापाद
नवैयर्थ्यापत्तेः शाब्देनाप्यनुभवजननेनैवृत्त्या शाब्दज्ञानजन्यज्ञानस्य पदार्थस्मृतेरपेक्षणात् तस्यापि
शाब्दोपजीविप्रमाणान्तर्गतत्वापत्तेस्तथापि यद्व्यक्तिजन्यानुभवसामान्यं परंपरया स्वजन्यज्ञानसमानाका

रज्ञानजनकशब्दवृत्तिज्ञानप्रयोज्यं तद्व्यक्तित्वं शाब्दोपपत्तीविप्रमाणत्वं दृश्यं चवेदगतप्रत्येकपदजन्यप्रत्ये
६६ कपदार्थोपस्थितिसहकृतानुमानव्यक्तिमादाय नासंभवः तस्याः पदार्थोपस्थितित्वाद्वाशब्दवृत्तिज्ञानसा
66 पेक्षत्वात् न वा पृथक्शब्दोपादानवैयर्थ्यं शब्दस्यानुभवजननार्थं साक्षाच्छब्दवृत्तिज्ञानसापेक्षत्वेपि पर
म्परया शब्दवृत्तिज्ञानसापेक्षत्वविरहात् स्वजन्यज्ञानसमानाकारकज्ञानजनकत्वस्य शब्दविशेषणत्वे
योगजप्रत्यक्षमादाय योगविधायवदातिरिक्तवेद एवाव्याप्तिस्तस्य योगविध्युपदेशकशब्दवृत्तिज्ञान
सापेक्षत्वेपि स्वजन्यज्ञानसमानाकारकज्ञानजनकशब्दवृत्तिज्ञानानुपपत्तीविकलत्वात् इतिवाच्यं अग्रिम
प्रमाणपदेनैव तद्वारणात् न हि योगिप्रत्यक्षे शब्दतत्समानविषयकशाब्दोपपत्तिभ्यामतिरिक्तं प्रमाणं ज
नकमस्ति योगधर्मस्य प्रमाणव्यापारात् न तु प्रमाणत्वात् मनसश्च साधारणत्वात् शब्दतदुपपत्तीविप्रमा राम
णातिरिक्तमनोजन्यतत्तच्छब्दजन्यबुद्ध्यादिभिरसंभववारणाय साधारणशरीरादिवारणाय चाग्रिम ६६

प्रमाणपदस्यासाधारणकारणपरत्वात् नचयोगिप्रत्यक्षस्थलेयोगजधर्मादृष्टसाधारणमस्तियतोद्वि
तीयप्रमाणमपदमसाधारणज्ञानजनकपरं अतएवाग्निमप्रमितिपदमप्यर्थवत् शब्दतदुपजीविप्रमाणा
तिरिक्तासाधारणवेद्यार्थगोचरस्मृतिकारणजन्यस्मृतिविषयार्थकत्वेनासंभववारकत्वात् विशिष्टज्ञाना
देः स्मृतिकरणस्यप्रमाकरत्वासंभवेनशब्दतदुपजीविप्रमाणातिरिक्तत्वात् प्रमितिपदोपादानेचनदो
षस्तस्यानुभवपरत्वात् अतएवज्ञानलक्षणयाऽसंभवप्रसंगोवारितः तत्रज्ञानस्यमनःप्रत्यासत्तित्वा
त् मनसश्चक्षुसाधारण्यात् तथाहि पिवेदार्थप्रतीत्यअस्मदाद्युच्चरितवेदभागेविशेष्यस्वरूपासि
द्धं शब्दजन्यवाक्यार्थज्ञानाजन्यजातीयप्रमाणशब्दत्वंयदिविशेष्यदलार्थस्तथापिसामान्यलक्षणा
यावद्धिइंद्रियप्रत्यासत्तिमतेतज्जन्यप्रत्यक्षविषयार्थकत्वात्तसत्वं स्वरूपासिद्धं नचस्वजन्यज्ञानस
मानाकारकत्वेनचरमप्रमितिविशेष्यानहिप्रमेयत्वादिनातज्जन्यधीवैजात्यप्रमितौसमानाकार

67

इतिवाच्यं तथापिवेदसमानार्थव्युत्क्रमोक्तशुकवाक्ये गतत्वात् व्यभिचारात् नचस्वावजातीय

शब्दजन्यवाक्यार्थज्ञानामूलकत्वं विवक्षणीयं व्युत्क्रमोक्तशुकवाक्यंतुस्वविजातीयशब्दजन्या-

वाक्यार्थमूलकमेवेवेदार्थप्रतीत्येव शुकाध्यापकतदध्यापकादिपुरुषेणव्युत्क्रमवाक्यवचनात् प

रम्परयाध्यापकतदध्यापकादिताद्दृशवाक्यार्थज्ञानमूलकत्वात् इति नातिव्याप्तिरितिवाच्यं तथासतिवा

क्यार्थपदोपादानवैयर्थ्यापातात् वाक्यार्थपदंहि अधुनिकवेदे अध्यापकोक्तवेदज्ञानजन्यत्वप्रयुक्ता-

व्याप्तिवारणप्रयोजनकं तस्याः स्वविजातीयपदेनैवनिराकृतत्वात् नचप्रमाणशब्दत्वेनैववेदसमाना

र्थकव्युत्क्रमोक्तशुकवाक्यवारणीयं तच्चादृष्टजनकाध्ययनयोग्यत्वसत्त्वं तत्तु दृष्टार्थकपुराणा

दिवारणायेतिवाच्यं स्वाध्यायोऽध्येतव्यः इत्यध्ययनविधिप्रवृत्तो अध्ययनविषयत्वघटितवेदत्वेन एम.

तन्निश्चयः तेनरूपेण तन्निश्चयंचविधिः प्रवृत्तिः स्वाध्यायपदस्य चवेदवाचकत्वादित्यन्योन्याश्रया ६७

त् किंच स्वर्गकामो यजेतेत्यस्य यागः स्वर्गसाधनमित्यर्थः इत्यादिरूपे वेदव्याख्याने भगवत्कृतेति व्या
प्तिः न चार्थपदस्य तात्पर्यविषयपरतया व्याख्यानस्य वेदतदर्थबोध्यबोधकभावतात्पर्यकत्वात् वेदः
केनचित् स्वार्थबोधकत्वेन बोधिताः महाजनपरिगृहीतत्वात् इत्यादितदनुमयातिरिक्तानुमानरूपप्रमा
णजन्यप्रमितिविषयार्थकत्वान्नातिव्याप्तिरिति वाच्यं तादृशानुमानजन्यप्रमितेः स्वजन्यज्ञानसमा
नाकारकत्वाभावात् व्याख्यानजन्यबोधे पदादीनां विशेषरूपेण भानात् उक्तानुमानजन्यबोधे च स्वार्थ
त्वेनैव तेषां भानात् अन्यथा वेदार्थस्य तादृशानुमानगोचरत्वादसंभवापत्तेः उच्यते ऽनुपलभ्यमानमूलां
तरत्वे सति महाजनपरिगृहीतवाच्यत्वं वेदत्वं स्मृतं तं मन्वादिवाक्यव्यवच्छेदाय यद्वा कार्यतात्पर्यं अतोपी
श्वरसिद्धिः आयोजनं सह स्वशाखवेदयोजनासाधनार्वाचीनसाध्योतिभावः धृतिः समस्तवेदधारणं त
दपि नास्मदाद्या आक्षिपत्यतः सहस्रशाखवेदाध्यापनं संगृहीतं पदादिति ईश्वरादिवाक्यं प्रमाणमस्य यतः

इतिलिंगादिप्रत्ययात् पुमभिप्रायपरोरादित्यर्थः श्रुतेरितिश्रुतिरवे विष्णुसंहितानारायणोपनिषद्रुद्राध्याय
६८ कैवल्योपनिषदादिरूपात्प्रमाणामित्यर्थः वाक्यादितियद्वाक्यं यत्संसर्गप्रतिपादकं तत्तज्ज्ञानपूर्वकमे
वेत्यर्थः संख्याविशेषादितिसंख्यासमाख्या कठकालापादिरूपासा-धनतत्तच्छाखाध्ययनाधीना न
68 नु क्षितिः सकर्तृका इत्यनुमाने क्षितिपदेनांकुराद्यभिधाने द्व्यणुकादौ संदिग्धानैकांतिक इति चेन्न स्वोपा
दानगोचरजन्यहृत्य जन्यानि जन्यानि स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिजन्यानि कार्यत्वा
त् घटवत् अत्र सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतया घटादौ सिद्धसाधनाद् जन्यांतं पक्षविशेषणं
शब्दादेः संग्रहाय स्वोपादानेतिशब्दस्य मृदंगगोचरकृतिजन्यत्वेपि तस्य शब्दानुपादनत्वात् अत्र तादृश
कृतिजन्यं यत् यद्वैरकूटीयास्यः तेन द्व्यणुकादौ स्वोपादानगोचरजन्यकृतेरप्रसिद्धावपि न पक्षता राम
वच्छेदकाव्याप्तिः नचैवं ध्वंससाधारण्यस्य पक्षत्वे तत्र स्वोपादानगर्भसाध्याभावः समवेतत्वेनप ६८

सविशेषणात् । साध्ये वा स्वोपादानपदस्य स्वाश्रयपरत्वात् नचैवं घटादिध्वंसेऽस्मदादिकृतिसाध्ये सिद्ध
साधनं पक्षेऽपि स्वोपादानपदस्य स्वाश्रयपरत्वात् नचैवं यागाद्यनुकूलकृतिध्वंसे व्याप्तिः स्वाधिष्ठान
गोचरजन्यप्रत्यक्षजन्यकृत्युभयाजन्यत्वस्योक्तत्वात् पक्षसाध्यस्थयोः स्वोपादानपदयोः समवायिपर
त्वे तु ध्वंसवारणाय सत्वेन समवायेन वा पक्षो विशेष्यः इत्युक्तमेव तन्न चादृष्टस्यात् कृतत्वमपि जन्यकृति
विशेषणं तेन वैदिककर्मगोचरकृतेरन्यथासिद्धत्वेन शरीरगोचरप्रत्यक्षकारणादिकृतिसाध्ये कालांतरेऽसि
न शरीरहस्तिगौरवे रूपे ईश्वरेविवादद्दृष्टाद्युपादानप्रत्यक्षाजन्यतया संदिग्धे नाव्याप्तिः । यद्वा स्वजनका
दृष्टाजनककृतिजन्यभिन्नत्वं पक्षतावच्छेदकं एवं सति पक्षप्रविष्टकृतौ जन्यत्वेन विनिशेष्ये इयं नचैवं स्वकृ
तकारकृतिलौकिकसाक्षात्कारादौ नोपपक्षे वहिर्भावे ननु च संदिग्धानैकान्तिकत्वं व्याप्तेरनिश्चयेऽदनवकाशात्
पक्ष इव तत्समेऽपि साध्यप्रसिद्धिसंभवात् प्रतिसाविषयादेरकिंचित्करत्वात् व्याप्तेरनिश्चये पक्षेऽपि संदिग्धानैकां

तिकत्वात् अतएव पक्षेतरापेक्षे संदिग्धसाध्याव्यापकत्वात्तन्निश्चितोपाधिः। अदृष्टद्वारकयत्किंचिदु

६६ पादानगोचरजन्यकृत्यजन्यं पक्षः नच शब्दे व्याप्तिस्तस्यानेन रूपेणापक्षत्वेपि शब्दत्वेनैव पक्षतया त

मुद्दालंबनरूपानुमितेरेवोत्पत्तिरित्याहुः तन्न एवंसति पक्षेऽपादानपदेोपादानवैयर्थ्यात्। द्व्यणुकमा

69 त्रं वा पक्षः जन्यमात्रं वा पक्षः हेतोरेव पक्षतावच्छेदकत्वेपि अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वान्ना

शतः। सिद्धसाधनं इतितुसारं। जन्यभावत्वं पक्षतावच्छेदकं विनाशिभावत्वं हेतुरित्यन्ये। यद्यपि सकर्तृकत्वं

अपरोक्षज्ञानचिकीर्षाकृतिजन्यत्वमिति। इतिमतः सिद्धिर्नभवति तथापि तादृशज्ञानाद्याश्रयत्वेनेश्वरसि

द्धिः नचेष्टसाधनत्वानुमितेः प्रवर्त्तकत्वात् तस्या एव कार्यजनकत्वं उपादानप्रत्यक्षं विना प्रवृत्तेस्तस्यापि

कार्यजनकत्वात् ननु अदृष्टद्वारा ज्ञानादिजन्यत्वात् सिद्धसाधनं नच यजेत मां हिंस्यादित्यादिना यागहिंसा राम-

देः क्रियाया एवेष्टसाधनत्वं श्रुत्या बुध्यते नतु ज्ञानादीनामिति न तेषामदृष्टजनकत्वं मानाभावात् इच्छावि ६६

शेषस्य यागादेस्तथात्वेपि ज्ञानकृत्योरतथात्वादिति वाच्यं अनुत्पादितक्रियाणामपि ज्ञानविशेषाणामुत्पादस्व
र्गसाधनत्वं बोध्यते तथा तीर्थगमनानुकूलकृत्यादेः एवं चादृष्टद्वारतादृशज्ञानकृत्यादिजन्यत्वेनार्थान्तरसंभवा
त् नचोपादानविषयत्वं कृत्यादेर्विवक्षितं तद्धि यत् किंचिदुपादानविषयत्वं स्वोपादानविषयत्वं वा नाद्यः पूर्वो
क्तकृत्यादिभिर्नामवारणात् नान्त्यः क्षित्याद्युपादानगोचरतादृशज्ञानादेरप्रसिद्धेः स्वत्वस्यानुगतस्याभावा
च्च नचादृष्टाजनकत्वं कृत्यादौ विवक्षितं ईश्वरकृतेरदृष्टजनकत्वात् इति चेन्नैवं अदृष्टप्रागभावव्याप्यप्रागभावा
प्रतियोगिज्ञानादिजन्यत्वस्य साध्यत्वात् अत्रादृष्टपदं स्वजनकादृष्टपरं अदृष्टसामान्यपरत्वे घटादौ साध्यवै
कल्यात् विशेषपरत्वे पूर्वोक्तकृत्यादिना सिद्धसाधनाद्व्याप्तिश्चात्र कालिकी तेन कपालादिमत्पक्षस्य दैशिका
तया घटजनकादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेपि न घटादेर्दृष्टान्तत्वासंभवः । नच स्वपदं तर्भा
ननुगमः स्वत्वगर्भसामान्यव्याप्त्याविशेषणाभावात् । वस्तुतः स्वोपादानगोचरत्वं गर्भ साध्यं तेन शब्दस्य

पक्षेऽनर्भावे पक्षेणांशतः सिद्धसाधनं स्वत्वगर्भसामान्यव्याप्त्याश्रयणान्नाप्रसिद्धिः स्वत्वाघटितसाध्यांत
७० रमग्रे वक्ष्यते न चैवमदृष्टाद्वारकत्वं साध्ये व्यर्थं जन्मांतरीयज्ञानादीनां स्वोपादानगोचरत्वादिति वाच्यं काली
शरीरवृत्तिगोररूपेंशतः सिद्धसाधनवारणाय तदुपादानात् अथवा स्वं अदृष्टजनकज्ञानादिकमेव तथा च
प्रतियोगिनि स्वत्वनिवेशान्नाननुगमः स्वजन्यादृष्टप्रागभावसमानकालीनप्रागभावप्रतियोगिजन्यत्वं ज्ञाना
५ दौ विवक्षितं अदृष्टजनकजन्यान्यत्वं वा तेनादृष्टजनकज्ञानादिना सिद्धसाधनं न च येन कपालप्रत्यक्षेण गं
गादिविषयकेणादृष्टमपि जनितं तज्जन्यघटे व्यभिचारस्तस्यापि पक्षसमत्वात् वस्तुतस्तु कार्यप्रतिहत्या
दीनामेकार्थप्रत्यासत्त्या कार्यकारणभावः कार्यस्य समवायः ज्ञानादीनां च विषयत्वं तथा च क्षित्यादौ ज्ञाना
दिजन्यत्वं सिद्धं स्वसमवायिविषयकज्ञानादिजन्यत्वमादाय पर्यवस्यति एतेन स्वोपादानत्वगर्भसाध्ये स्व राम·
त्वाननुगमः एवं स्वजनकादृष्टप्रागभावगर्भेपि साध्ये तथैति निरस्तं अतएव नात्र प्रयोजकत्वं कार्यत्वे ७०

नकृतित्वादिना कार्यकारणभावस्यानुकूलतर्कत्वादितिकार्यत्वं कृतिजन्यत्वरूपं यद्यपि पक्षेण सिद्धं तथा
पि प्रागभावप्रतियोगित्वं तत्प्रागभावमखंडोपाधिः गंधानाधारसमयानां आधारत्वं तदित्यन्ये। उक्तसाध्य
स्य ध्वंसेऽभावात् सत्वेन समवेतत्वेन वा कार्यविशेष्यत्वं उपाधिः। कृत्यादिकार्ययोरुक्ते कार्थप्रत्यासत्या का
र्यकारणभावे न हेतोः साध्यव्याप्यतया तद्व्यापकतया साध्याव्यापकत्वात् परमाणुद्व्यणुकादावपि ऽद्
तरूपावच्छिन्नमहत्वाभावप्रत्यक्षत्वेन न हेतुता अलौकिकप्रत्यक्षात्तदनुत्पत्तेः नचालौकिकप्रत्यक्षान्यप्रत्य
क्षत्वेन तथा किंचिद्देशेऽलौकिकात् कपालांशेऽलौकिकाद्यपि कार्योत्पत्तेः किंतु लौकिकप्रत्यक्षत्वेन लौकि
कत्वं च साक्षात् करोमीत्यनुव्यवसायसिद्धो विषयताविशेषः नतु साक्षात्कारित्वजातिरेव सेोऽभाद्युपनी
तभाने सोऽभं साक्षात्करोमीत्यप्रयोगात् नचलौकिकविषयतायानित्यसाधारण्णत्वेद्इंद्रियसंयोगादिजन्य
तावच्छेदिकासमनिस्यादितिवाच्यं प्रत्यक्षामीत्यादिप्रतीतिसिद्धविषयताविशेषाणामेव चक्षुःसंयोगादिजन्य

तावच्छेदकत्वात् अस्तु वा जन्यत्वघणुकर्मेदृहतोर्लाघवेन नियतत्वे सिद्धे जन्यत्वमेहत्वमेव जन्यतावच्छेद
७१ कंकल्प्यते इति चेद् अनाथनंतानां जन्यतानानां कल्पनमपेक्ष्य लाघवेन नियतत्वानकल्पनात् श्रुतिरपि
नियतत्वानस्य वाधिकास्य सहाय अन्यथा तदप्रामाण्यापत्तेः। ननु कार्यत्वं न घटादिसाधारणानुगतमिति।
घटत्वादिकमेव कृतिजन्यतावच्छेदकं इति कथमीश्वरसिद्धिरिति चेन्न प्रागभावप्रतियोगित्वस्यानुगतत्वात्
प्रागभावास्वीकारे ध्वंसप्रतियोगित्वस्यैव नथामीश्वरसिद्धिरिति चेन्न प्रागभावप्रतियोगित्वस्यानुगत
त्वात् प्रागभावास्वीकारे ध्वंसप्रतियोगित्वस्यैव तथात्वात् तथापि घटत्वाद्यपेक्षया गौरवात् कार्यत्वं
नकार्यतावच्छेदकं कल्प्यते इति चेदनाप्यनंतानां जन्यतानानां कल्पनमपेक्ष्य लाघवेन नियतत्वानकल्पना
त् श्रुतिरपि नियता। तानस्य वाधिकास्य सहाय (॰) किंतु घटत्वादिकमेवेत्याति चेन्न संग्राहकैकत्वरूपलाघ राम॰
वस्य वलवत्वात् अत एव कार्यत्वमेव द्रव्यजन्यतावच्छेदकं। दीधितिकृतस्तु अस्तु घटत्वेन कार्यकारण ७१

भावः तथापि द्वैते तत्का घटत्वस्य कृतिजन्यत्वव्याप्यत्वेसिद्धे खंडघटे कृतिजन्यानुमितिर्लाघवेननित्यकृतिंवि
षयीकरोतितस्यकुलालहस्तजन्यत्वादित्याहुः। तच्चिंत्यं खंडघटस्यापि कपालसंयोगद्वाराकुलालकृतिज
न्यत्वात् वैषयिकलाघवपाकस्थले आपरमाणु घटस्य नाशेन पाकजन्यघटांतरस्य कपालसंयोगद्वाराकु
लालहस्तजन्यस्य जनकतया नित्यकृतिसिद्धिरितिचेत्तर्हि पाकजन्यघटस्य संयोगद्वारा दंडजन्यस्य जनक
तया नित्यदंडस्यापि सिद्ध्यापत्तेः। विजातीयघटत्वं दंडजन्यतावच्छेदकमितिचेत्तर्हि तदेव कृतिजन्यतावच्छे
दकमस्त्विति नायं पंथाः। ईश्वरसाधकानुमानसामान्यस्य श्रुतिरपि सहायः। तथाहि विश्वतश्चक्षुरुत
विश्वतोमुखो विश्वतोबाहुरुत विश्वतःपात् संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः। विश्वस्य
गोप्ता भुवनस्य कर्त्ता। अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते। वेदांतकृद्वेदविदेव चाहं इत्यादिस्मृतिरपि। आ
यजने ईश्वराधीनत्वसाधकं यदा स दैवो जागर्ति तदेवं चेष्टते जगत्। यदा स्वपिति शांतात्मा तदा सर्वं नि

मीतिलं। आत्मा जतुराना श्रोऽयमात्मनः सुखदुःखयोः। देश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा॥ म
याध्यक्षेण प्रकृतिः सूयते सचराचरं। तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च॥ धृतिसाधकं तु॥ एतस्य
वाक्षरस्य प्रशासने गार्गि द्यावापृथिव्यो विधृते तिष्ठतः॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लो
कत्रयमाविश्य बिभर्त्यव्यय ईश्वरः॥ आदिपद्याऽस्य संग्रहणे। एष सर्वाणि भूतानि सममभिव्याप्यप्पह
त्तिभिः। जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत्॥ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकां। कल्पक्ष
ये पुनस्तानि कल्पादौ विसृजाम्यहं॥ व्यवहारे च॥ पिताहमस्य जगतो माता धाता पितामहः। तथा यदि ह्य
हं न वर्त्तेयं जातु कर्मण्यतन्द्रितः। मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः। उत्सीदेयुरिमे लोका न कुर्यां क
र्म चेदहं॥ एवं नमः कुलालेभ्यः कर्मकारेभ्यश्च वो नम इत्यादीनि यजूंषि। श्रुतिकर्तृत्वे॥ अनन्तरं च वक् राम
त्रेभ्यो वेदास्तस्य विनिःसृताः। प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते। तस्माद्यज्ञात्सर्वहुत ऋचः सा ७२

मानियहिरे ॥ क्षितिः कर्तृकाकार्यत्वादित्यनुमाने बाधमुद्धरति । नबाधोस्योपजीव्यत्वात् तत्प्रतिरोधोनदुर्व
लैः । सिद्ध्यसिद्ध्योर्विरोधो न नासिद्धिरनिबंधना । कर्त्तुरशरीरितया ईश्वरेण कर्त्राऽशरीरित्वादितिबाधो
त्रदोषः क्षितिरकर्तृका शरीराजन्यत्वादिसत्प्रतिपक्षोवा । तत्राशरीरत्वेप्यपेक्षितव्याप्तिविरोधिनी वाऽशरीरि
त्वाशरीरित्वयोर्विरोधो वा शरीराजन्यत्वमुपाधिर्वा तत्र नाद्यद्वयमित्याह नबाधोस्येति । अस्यकार्यत्वहेते
रीश्वरेऽकर्तृत्वरूपबाधोनेत्यर्थः ईश्वरेण कर्त्राऽशरीरित्वादित्यत्र ईश्वररूपपक्षज्ञापकतयाकार्यत्व
हेतुरुपजीव्यः अन्यथापक्षाशहे कथं तत्राकर्तृत्वानुमानं पक्षस्य ईश्वरस्य तेन हेतुनाऽसिद्धौ धर्मिग्राह
केण कर्तृत्वविशिष्टस्यैव सिद्धेः न तत्राकर्तृत्वानुमानमित्यर्थः प्रतिरोधः क्षितिरकर्तृका शरीराजन्य
त्वादिति सत्प्रतिपक्षः सदुर्वलैर्नेत्यर्थः शरीराजन्यत्वादिति हेतौ शरीरांशस्य व्यर्थत्वेन व्याप्यत्वा
सिद्धतयातस्यदुर्वलत्वमितिभावः । तृतीयेपिकार्यत्वहेतोर्व्याप्यपक्षधर्मतयावलवत्त्वमिति चिरो ।

धिव्यासिग्रहश्च तदधीनानुमितौ न विरोध इत्यर्थः चतुर्थेदोषमाह सिद्ध्यसिद्ध्योरिति यदि पक्षधर्मत
७३ याऽशरीरत्वेव सिद्धस्तदा न विरोधः कार्यत्वहेतौ शरीरकर्तृकत्वव्यभिचारस्योपलंभेन तद्व्याप्तेरभा
23 वात् अतस्तत्र शरीरासिद्धिरिति न विरोधः। अथ पक्षधर्मतयानश्वरशरीरिणः सिद्धिः तदा शरीरि
त्वाशरीरित्वयो व्याप्तिपक्षधर्मतयोपनेययो रीश्वरात्मकैकधर्मिवृत्तित्वाभावलक्षणो यो विरोधः
स न ईश्वररूपधर्मिण एवाग्रहादित्यर्थः पंचमे आह नासिद्धिरिति शरीरजन्यत्वोपाधिना व्याप्यत्वासि
द्धिः सा न यतः अनिबंधनानि बीजानि अनुकूलतर्काभावादि व्याप्यत्वासिद्धेर्बीजं न चेह तदस्ति कृति
त्वेन कार्यत्वेन कार्यकारणभावस्य ईश्वरसद्भावादेव सद्भावादिति भावः एवं चानुकूलतर्केण
हेतौ व्याप्यत्वे सिद्धे तद्व्यापकत्वेन उपाधौ शरीरजन्यत्वे साध्याव्यापकत्वमनुमेयमित्याश राम·
यः। यदीश्वरः कर्त्ता स्यात् शरीरी स्यात् इति प्रतिकूलतर्कान्नेश्वरसिद्धिरित्यत आह। तर्काभास ७३

तयान्येषांतर्काशुद्धिरदूषणं। अनुकूलस्तु तर्कोऽत्र कार्यलोपो विभूषणं। तर्काशुद्धिःप्रतिकूलतर्काशु
द्धिः अनुमानस्येति शेषः। यदीश्वरः कर्ता स्यादित्यादयस्तु तर्का ईश्वरासिद्धेन प्रभवंति तत्तसिद्धौ तु धर्मि
ग्राहकेनाशरीरत्वस्यैव सिद्धेः अन्येषामिति वृद्धवचनेन कर्त्ता स्यात् सुखी दुःखी स्यादित्यादेः संग्र
हः। ननु अनुकूलतर्काभावान्न कार्यसिद्धिरतोऽनुकूलस्त्विति हेतोः कार्यमात्रहेतुत्वग्रहांतकृत्स्य भा
वे कार्यं न स्यादित्यनुकूलतर्क एव कार्यलोपपदेनोक्तः। स विभूषणं व्याप्तिग्रहानुकूलोऽस्तीत्यर्थः
उक्ततर्कसहकृतो घाद्यायां भूमौ जनयन्नेव एक इत्यादीश्वरसाधकः। अर्थं धर्माोपदेशं चवेदशास्त्रावि
रोधिना। यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः। इति तर्कानुग्रहाऽनागमस्यैव बलवत्त्वात्॥ नन्वायो
जनं कर्मतच्च हस्तिजन्या भवति घणुकादि प्रयोजककर्महेतुहस्त्याश्रय आत्मा सिद्ध्यतीति न युक्तं स
र्गाद्यपरमाणुक्रियाहेतुतया यत्नस्य परमाणावेवाभ्युपगंतुमुचितत्वात् किं चयत्नं विनाअ

दृष्टादेव तत्कर्मोस्तु अपि च चेष्टादिरूपक्रियाविशेषो यत्नजन्यो न तु क्रियामात्रं इति दोषत्रयं क्रमेण निरस्य
७४ 74 ति स्वातंत्र्येजडत्वाहानिर्नादृष्टं दृष्टसाधनं हेत्वभावे फलाभावो विशेषस्तु विशेषवान्॥ अत्राद्यपक्षे स्वा
तंत्र्येण परमाणोश्चेतन्येन जडताहानिः अचेतनस्य चेतनप्रेरितस्यैव जनकत्वात् द्वितीये दृष्टं न दृष्टघात
कं न दृष्टकारणत्यागेन कार्यजनकं अन्यथा दृष्टादेव सकलकार्योत्पादे हेत्वंतरोच्छेदापत्तेः ननु विली
यत्वंतरं तत्राह हेत्वभावे इति अन्वयव्यतिरेकाभ्यां घटादौ दंडादेरिव कार्यमात्रे कृतेरपि हेतुत्वग्रहात्तत
दभावे कुलादिकार्योत्पत्तिरपि न स्यादित्यर्थः तृतीये विशेषश्चेष्टात्मकक्रियाविशेषः विशेषवान् प्रयत्न
विशेषजन्यत्वरूपविशेषधर्मवान्। तथा च विशेषयोः कार्यकारणभावे विशिष्य गृहीते सामान्यतः
क्रियात्वावच्छिन्ने प्रयत्ने न हेतुत्वे सामान्यतो घटत्वावच्छिन्नं प्रति दंडत्वादिना हेतुत्वविनयापत्तेः॥ राम
ब्रह्मांडं प्रयत्नशक्तिकं रुद्धपतनकं धृतिमत्त्वात् ब्रह्मांडनाशः प्रयत्नजन्यो नाशत्वादित्यत्र तर्कमाहका ७४

र्यत्वान्निरुपाधित्वमेवं धृतिविनाशयोः। विच्छेदं तु पदस्यापि प्रत्ययादेश्च पूर्ववत्। धृतेः प्रयत्नजन्यत्वमिव
तत्र हेतावनुकूलतर्कः एवं विनाशस्यापि जन्यत्वमेव तथा यथा धृतिविनाशयोः कार्यकारणभावो विप
क्षबाधको निरुपाधित्वग्राहकः तथा पदस्यापि स एव तर्क आहकः इत्याह पदस्यापीति पदस्य पद्यते गम्यते नेन
इत्यनेन उक्तस्य घटादिव्यवहारस्य नन्वयमनादिघटादिव्यवहारः पूर्वपूर्वकुलालादिव्यवहारप्रयुक्त एव भ
विष्यतीति तदर्थं किमीश्वरेणेत्यत आह विच्छेदेनेति प्रलये विच्छेदादयं व्यवहारो नानादिस्तथा च स्वर्गादौ त
द्व्यवहारप्रयुक्तवर्तकः कश्चिदपेक्षित इति भावः एवं प्रत्ययादेर्वेदजन्यशाब्दधीप्रामाण्यादेरपि निरुपा
धित्वं पूर्ववत् कार्यकारणभावादनुकूलतर्कादेव शाब्दप्रमायां वक्तृयथार्थज्ञानरूपगुणजन्यत्वस्य व्यव
स्थापनादिति भावः। अथ यथाकार्यायोजनेत्यादिकारिकाऽन्यथा व्याख्यायते॥ उद्देश्य एव तात्पर्यव्या
ख्या विश्वदृशः सतः। ईश्वरादिपदं सार्थं लोकवृत्त्यनुसारतः॥ कार्यत्वमुद्देश्यत्वमुद्देशोऽभिप्रायः स एव

तात्पर्यं तात्पर्यविषय एव शाब्दप्रामाण्यवेद्यस्य वक्तुस्तात्पर्यं स एवेश्वर इति उद्देश्य इत्यादि प्रथमच
७५ रणस्याशयः एवं च तदेव परमुद्देश्यं यस्येति व्युत्पत्त्या यदुद्देशेन यः शब्दः प्रयुज्यते स तत्परः तथा हि प्रशंसावा
75 क्यं प्रवृत्तिमुद्दिश्य प्रयुज्यते इति चेत् प्रवृत्तिपरं निंदावाक्यं च निवृत्तिमुद्दिश्य इति तन्निवृत्तिपरं इति तत्प
रत्वनिर्वाहः एवमन्यत्रापि स्वयमूहनीयं न तु तदेव परं साध्यं यस्य इति व्युत्पत्त्या तत्साधकत्वं तत्परत्वं वि
षयस्य शाब्देऽसाध्यत्वात् न च प्रशस्तनिंदितत्वार्थप्रतिपादनद्वारेण प्रवृत्तिनिवृत्तिरूपं साध्यं परमुच्यते
इति वाच्यं गंगायां घोष इत्यत्र तीरस्य प्रवृत्तिनिवृत्तिरूपस्यासाध्यस्यापि परत्वात् न च तद्विषयनिवृत्ति
प्रवृत्तिपरत्वेनैव तत्परत्वव्यवहार इति वाच्यं प्रवृत्तिपरतयानभिहितप्रवृत्तिपत्तिमात्रपरवाक्यस्य ति
परत्वव्याघातात् न चातदेव परं प्रतिपाद्यं यस्येति व्युत्पत्त्या तत्प्रतिपादकत्वमेव तत्परत्वं लाक्षणिक राम·
स्य लक्ष्यार्थपरत्वव्याघातात् लक्ष्यार्थस्य पदवाचकतार्थाभ्यामन्यत्वेन पदप्रतिपाद्यत्वाभावात् न च तत ७५

द्देव परं स्वार्थाविनाभावेन प्रतिपाद्यं यस्येति व्युत्पत्त्या तत्प्रतिपादकत्वमेव तत्परत्वं लाक्षणिकस्य लक्ष्या
र्थपरत्वव्याघातात् लक्ष्यार्थस्य पदवाच्यार्थाभ्यामन्यत्वेन पदप्रतिपाद्यत्वाभावात् नच तद्देव परं स्वार्था
विनाभावेन प्रतिपाद्यं यस्येति व्युत्पत्त्या स्वार्थाविनाभूतार्थ तत्कत्वं तत्परत्वमिति वाच्यं गंगायां जलमित्य
स्यापि तीरपरत्वापत्तेः अविनाभावस्य तादवस्थ्यात् नच मुख्यार्थे समभिव्याहृतपदार्थान्तरान्वयबोधे स
त्यविनाभूतार्थपरत्वं अन्यथा तु मुख्यार्थपरत्वमिति वाच्यं तस्मिन् सत्यपि गच्छ गच्छामीत्यादेर्गमनेवा
रणे तात्पर्यात् नच मया न गंतव्यं मङ्गमनस्य प्रियामरणहेतुत्वात् इत्यनुमानात्तन्निवारणप्रतीत्तिर्न
तु वाक्यात् हेतुत्वानं तु अन्यत्र जन्ममरणमंतरेण न भवतीत्याक्षेपादेवेति वाच्यं यतोऽनुमानद्वारा ता
त्पर्यं वाक्यस्यैवं निर्बृहति यथा पर्वते धूमोस्तीति वह्निः तात्पर्यकं वाक्यं अनुमानलभ्यार्थतात्पर्यक
मिति । नच तदेव परं प्रयोजनं परे पतीति व्युत्पत्त्या तत्प्रयोजनकत्वं तत्परत्वमिति वाच्यं यतः प्रयोजनत्वं ।

प्रतिपाद्यापेक्ष्यं प्रतिपादकापेक्ष्यं वा तत्र न प्रथमस्तात्पर्यार्थ एव शब्दस्य प्रामाण्यात् शब्दप्रामाण्यस्य
७६ प्रतिपाद्यपुरुषापेक्षितप्रयोजनाधीनत्वापत्तेः तथात्वे च यस्य यदपेक्षितं तं प्रति तत्परत्वप्रसंगेन
76 एकार्थप्रतिपिपादयिषयोच्चरिते अस्तंगतः सवितेत्यत्र वाक्यभेदप्रसंगः तत्र ब्राह्मणस्य संध्योपा
सने वैश्यायाः प्रसाधाने वणिजः पण्योत्सारणे स्नुषायाः दीपदाने गोपस्य गवानयने गृहस्थस्याति
थिपरिग्रहे भृतकस्य कर्मकरणनिवर्त्तने प्रयोजनसत्वेन तात्पर्यभेदात् न च तदर्थसाध्यत्वेनापेक्षानि
यमः संध्योपासनादिक्रियायाश्च न तदर्थं सवितृरस्तगमनादिसाध्येति वाच्यं तथापि धर्मोस्तीत्यत्र साध्य
स्य कार्यज्ञाप्यभेदेन बहुविधतया वाक्यभेदप्रसंगात् धर्मस्य हि प्रदेशप्रदर्शनरूपामतामशकनिवृ
त्त्यादिकार्यं अदृष्टं धनदहनाद्यनेकं ज्ञाप्यमिति मोक्षार्थस्य तदर्थसाध्यत्वेन तत्परत्वव्याहतेश्च नापि राम-
प्रतिपादकापेक्ष्यं वेदे प्रयोक्तात तदनंगीकारात् आयोजनं व्याख्यानं तथा च वेदाः केनचिद्व्याख्यातामहा। ७६

जनपरिग्रहीतत्वात् अव्याख्यातत्वे तदर्थानवगमेऽननुष्ठानापत्तेः एकदेशदर्शिनश्चास्मदादेर्व्याख्यायां
नविश्वास इति न व्याख्यातत्वम् अत ईश्वरसिद्धिरिति द्वितीयचरणस्याशयः सतीनिश्चितप्रामाण्ये पदे ईश्वरा
दिपदानां सर्वज्ञेन नित्यज्ञानवता वेदादेव शक्तिग्रहात्ततोपि तत्सिद्धिरिति आह ईश्वरादीति आदिपदात् प्रणव
परिग्रहः तस्यापीश्वरवाचकत्वात् ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। इति भगवद्गीतावच
नात् ननु ईश्वरमुपासीतेत्यादौ स्वपरतयासार्थकत्वमिति नेश्वरवाचकत्वं अतो लोकेति लोकानुसारे
णाघटादिपदवदर्थविशेषवाचकत्वेन ईश्वरादिपदानां स्ववाचकत्वाभावादित्यर्थः यद्वा यथा लोकप्रसिद्ध
स्य यवादिपदस्य वसंते सर्वशस्यानामिति वाक्यशेषाच्छक्तिग्रहस्तथा सर्वज्ञता तृप्तिरनादिबोधः स्वतं
त्रता नित्यमलुप्तशक्तिः। अनंतशक्तिश्च विभोर्विधिज्ञाः षडाहुरंगानि महेश्वरस्येति वाक्यविशेषादी
श्वरादिपदशक्तिग्रह इत्यर्थः तत्र चांगानि धर्माः। अहं सर्वस्य प्रभवो मत्त इत्यत्राहंपदं स्वतंत्रोच्चारणे

तत्परं लोकतथाकल्पनात् तादृशो व्युत्पादयिता ईश्वर एवेति तत्सिद्धिः एवं लोकत्वं दृष्टत्वं लोके यदस्मदादि
७७ पदे शक्तिकल्पनं तदनुसारात् इत्यर्थः एवं धृतिर्धारणं प्रत्यादेरित्यादिपदात् अनुष्ठानसंग्रहः वेदाए
तद्विषयाः नित्यत्वानामन्यतान्यतमत्वं वक्तृकावाक्यत्वात् सा ते भवतु इत्यादिवत् । यागादियोगविषयि
77 काः नित्यत्वानामन्यतानवतानुष्ठितः अनुष्ठितत्वात् पाकादिवादितिप्रयोगमप्याहुः । प्रत्ययतः वि
धिप्रत्ययात् आप्ताभिप्रायो विध्यर्थः यस्याभिप्रायस्तथा स ईश्वर इत्याशयेनाभिप्रायं विध्यर्थं वक्तुं
प्रथमं परमतमुपन्यस्य स्वमतं व्यवस्थापयति ॥ प्रवृत्तिकृतिरेवात्र सा चेच्छातो यतश्च सा । तज्ज्ञानं वि
षयास्तस्य विधिस्तज्ज्ञापकोऽथवा । आद्याप्रवृत्तिरिच्छेवेतिप्रयोगात् । यद्यपीच्छात्रप्रवृत्तिशब्दार्थ
स्तथापि प्रकृते कृतिरेवेत्यर्थः विधिजन्यत्वान्नोत प्रवृत्तिर्दृश्यते सा चेच्छातः चिकीर्षातः । चिकीर्षा च य राम-
तः यस्मात् कृतिसाध्येष्टसाधनतात्वानान् तस्यतानस्याविषयः कृतिसाध्यत्वं इष्टसाधनत्वं चवि ७७

ध्यर्थः इति प्राचां मतं स्वमतमाह तज्ज्ञापक इति इष्टसाधनतानुमापकाद्व्याप्तिभिप्रायो विध्यर्थ इत्यर्थः
यागः इष्टसाधनं आप्ताभिप्रायविषयत्वात् इत्यनुमानं प्रवृत्तिप्रयोजके इच्छाहेतुज्ञानविषयं पारिशेष्ययति इ
ष्टहानेरनिष्टाप्तेः प्रवृत्तेर्विरोधतः। असत्वात्प्रत्ययत्यागात् कर्तृधर्मो न संकरात्। कर्तृधर्मो न विध्यर्थः
सहि कर्तृधर्मः स्यंदः प्रयत्नः इच्छा वा त्रयमपि न विध्यर्थः इति क्रमेण दर्शयति इष्टहानेरित्यादिनास्यं
दस्य विध्यर्थत्वे निदिध्यासितव्य इत्यादितो ऽप्रवृत्तिप्रसंगात् ग्रामं गच्छतीत्यादितः प्रवृत्त्यापत्तेश्च य
त्नस्य विध्यर्थत्वे दोषमाह। प्रवृत्तेरिति आख्यातान्तरेण पचतीत्यादिना यत्नबोधनेपीष्टसाधनताया
ऽज्ञाने निष्टसाधनताज्ञाने वा ऽप्रवृत्तेः। इच्छाया विध्यर्थत्वे दोषमाह विरोधत इति इच्छा [illegible] निष्टसा
धनताज्ञाने वा ऽप्रवृत्तेः। इच्छाया विध्यर्थत्वे दोषमाह। विरोधत इति नच्छेतानस्य इच्छाहेतुत्वे विरोधादि
त्यर्थः। ननु ज्ञायमानो यत्न एव प्रवर्त्तकोस्तु अतो न विरोध इत्यर्थः। तिस्वस्य स्वाजनकत्वादिति भाव इ

।नन्विच्छाज्ञानं लिङ्गं जन्यते तच्चेच्छायां यत्ने च हेतुरस्तु अतो रसत्वादिति प्रवृत्तिहेतोः स्वरूपसत्त्वाद् इच्छा
७८ लिङ्ग- श्रवणकालेऽभावादिच्छाज्ञानेऽप्यप्रवृत्तेरित्यर्थः ननु लिङ्ग- एव इच्छां जनयति अतः प्रत्ययस्या
78 गादिति प्रत्ययस्येच्छाकारणत्वे न गृहीतस्य ज्ञानस्य त्यागात् त्यागापत्ते व्यभिचारादित्यर्थः ननु सुखादि
प्रकारिका फलेच्छा लिङ्गार्थोऽस्तु अतः संकरादिति इष्टसाधनताज्ञानस्य उपाये इच्छाहेतोः स्वरूपं स्वीका
रात् अत्र च कारणान्तराभावाल्लिङ्ग- पदमेव वस्तु कारणं फलेच्छाज्ञानं नेच्छायां प्रवृत्तौ वा हेतुः तेन वि
नापि तदुत्पत्तेः एवं च संकरात् सर्वप्रवर्तकत्वेनाभिमतस्य क्वचित् कस्य फलेच्छाज्ञानस्येष्टसाधनता
ज्ञानसहचरित्वादिष्टसाधनस्यावश्यकत्वेन इच्छालिङ्गार्थः। ननु यत्नज्ञानमेव प्रवर्तकमस्तु आख्या
तान्तरं च नयत्नवाचकं अनुकूलव्यापार एवात्मस्य शक्तेः रथो गच्छतीत्यादौ कल्पनादत आह। कृताकृत राम
विभागेन कर्तृरूपव्यवस्थया। यत्न एव कृतिः पूर्वापरस्मिन् सैव भावना। क्रियाजन्यत्वादिशेषेऽपि यत्न ७८

जन्यत्वप्रतिसंधानाभ्यां घटांकुरयोः कृताकृतत्वव्यवहारात् कुलालादेरिव कर्तृत्वं न चक्रादिकारकांतरमिति व्य
वहारः तथा च यत्न एव कृतिः कृञर्थः कर्तृरूपव्यवस्थया कर्तृव्यपदेशस्य प्रतिनियतत्वेन यदि व्यापारः कृ
ञर्थस्तदा करणादावपि व्यापारवति कर्तृव्यवहारः स्यादिति नन्वेवमस्य यत्नपर्यायता स्यादित्यत आह पूर्वे
ति परस्मिन् उत्तरवर्त्तिफले सेति सैव कृतिरेवमाख्यातवाच्या तथा च फलानुकूलयत्न आख्यातार्थ यद्वा
पचत्यापि भाविद्यत्नप्रागभावस्य तत्र तु ध्वंसस्य सत्वात् पक्ष्यपाक्षीदिति स्यादतः पूर्वापरेति पूर्वापरस्मि
न् पूर्वापरीभूतत्वे सति तथा च पूर्वापरीभूतकृतिकलाप एवाख्यातार्थः ताहृशान्यतमयत्नसत्वे पचतीति
तेषु आद्यस्य प्रागभावसत्वे पक्ष्यती ति अंत्यस्य ध्वंससत्वे पाक्षादिति प्रयोगादिति भावः यत्नत्वं अनुकू
लत्वं पूर्वापरीभूतत्वं त्रयमाख्यातार्थः इति प्रकाशकृतः ननु कृञर्थोस्तु कृतिराख्यातस्य तु व्यापारत्वे
नैव यत्नवाचकत्वं न यत्नत्वेन रथो गच्छतीत्याद्यनुरोधात् अत्राह भावनैव हि यत्नार्था सर्वाख्यातस्य गो

चरः। तया विवरणध्रौव्यादाक्षेपानुपपत्तितः॥ तयाभावनयाकृतिरूपयाकृतिवाचकपदेनेत्यावत्

७९ पचति पाकं करोतीत्यत्राथ करोतिनाऽऽख्यातार्थविवरणात्तत्रशक्तिः अत आह आक्षेपलभ्ये संख्येये

79 येनाभिधानस्य काष्ठादिसाधारणतयानतत्रव्याप्यत्वमतो नतेभ्यो नयत्वानुमानेमित्यर्थः। ननु पचतिपा

कयत्नवानिति विवरणात् कर्त्तर्य्यवशक्तिः स्यादत आह। आक्षेपलभ्ये संख्येये नाभिधानस्य कल्प

ना। संख्येयमात्रलाभेपि साकांक्षत्वेन व्यवस्थितिः॥ आक्षेपादेव संख्येयलाभे न तत्र शक्तिकल्पनं अन्यैर

लभ्यो हि शब्दार्थ इति न्यायात् संख्यया संख्येयमात्रस्याक्षेपेपि विशिष्यस्यैव चैत्रादेः साकांक्षेण श्रवणां

तरविहितेनाख्यातेन व्यवस्थितिर्वोधनं। यं यं भावनाद्वैति तं तं संख्यापीति व्युत्पत्तेः। यत्र भावनान्वयधी

सामग्री तत्र संख्यान्वयः सा च प्रथमांतपदोपस्थाप्यमिति संख्यान्वयोपि तत्रैवेति वस्तु तस्तु अपमा

क्षेपोपस्थ प्रथमांतपदोपस्थाप्यत्वमिति इतरविशेषणत्वेन तात्पर्यविषयत्वे सति प्रथमांतपदोपस्थाप्य राम- ७९

त्वमिति इतरविशेषणत्वेन तात्पर्यविषयत्वे सति प्रथमांतपदोपस्थाप्यत्वं भावनान्वये तंत्रं नीलाघटं गच्छति
नीलघटो नीलाद्यो भावनान्वयवारणाय सत्यंतं। अस्तु कर्म धर्मो विधिस्तत्राह अतिप्रसंगत्वफलं नापूर्वं
नत्वहानितः। तद्लाभं न कार्यं च न क्रियाप्यप्रवृत्तितः॥ कर्मणा धर्मः कार्यत्वं विध्यर्थो वा व्यस्तत्र कर्मप
देन फलं विवक्षितं अपूर्वं वा यागादि क्रिया वा नाद्यः इत्याह फलमिति न फलं कर्मपदार्थ इत्यर्थः अतिप्रसं
गात् स्वर्गसाधनत्वज्ञानाभावेपि स्वर्गे कार्यत्वज्ञानात् प्रवृत्त्यापत्तेरित्यर्थः न द्वितीय इत्याह नापूर्वमिति
शब्दबोधात् पूर्वमनुपस्थितमित्यपूर्वं तस्य पूर्वमुपस्थितो अपूर्वत्वव्याघातः अनुपस्थितो तत्र कथं
शक्तिधीः अतः कार्यत्वरूपेण कार्ये घटादौ शक्तिग्रहः योप्यतावच्छेदकापूर्वस्य कार्यविशेषस्य शा
ब्दबोध मानं तत्राह अनाप्त्यात्वकार्यं चेति नित्यनिषेधापूर्वयोरलाभप्रसंगात् तत्र फलकामस्य नियो
ज्यस्याभावात् तयद्यकर्मरणो ऽपूर्वस्य धर्मो ऽपूर्वत्वं विध्यर्थस्तत्राह नापूर्वमिति अपूर्वमिति ज्ञानं न प्र।

८० ४०
वर्त्तकं न चातद्विधिनाजनयितुं शक्यं तस्य पूर्वं ज्ञानं तया शक्यत्वेनाग्रहणात् यदि कार्यत्वरूपेनापूर्वे शक्तिस्तत्रा
ह तदलाभादिति कार्यत्वरूपेणापि पूर्वमपूर्वानुपस्थित्या शक्त्यग्रहादिति। न तृतीयइत्याह नक्रिया
पीति। क्रियायागादिस्तद्धर्मः कार्यत्वं तन्मात्रं न विध्यर्थः अनिष्टसाधनताज्ञानकालेपि कार्यताज्ञा
नात् प्रवृत्त्यापत्तेः। अपिना पूर्वोक्तदोषादपूर्वमपि नेत्यर्थः ननु कर्मशब्दस्तद्धर्मेभिधाप्रवर्त्तनाशब्द
वाच्या तज्ज्ञानं प्रवर्त्तकमिति सैव विध्यर्थस्तत्राह॥ असत्वाद् प्रवृत्तेश्च नाभिधापि गरीयसी। वाचकस्य
समानत्वात्परिशेषोपि दुर्लभः। अभिधायां समानाभावात् यागाभिधापाकाभिधादित्यादिज्ञानात् प्र
वृत्तेश्चेत्यर्थः गरीयसीति उक्तयुक्त्याभिधाभिन्नस्य कस्यचित् ज्ञानं प्रवर्त्तकं वाच्यं तथा च तत्र शक्तिरव
श्यं वाच्या एवं चाभिधायाः शक्यत्वे गौरवं इत्यर्थः अभिधाप्रवर्त्तकेति भट्टाः तेषां चायमाशयः पुरु
षस्य प्रवृत्तिर्द्विधा स्वेच्छया अन्यप्रेरणया च आचार्यप्रेरितोहं गामानयामि न तु स्वेच्छया इति व्य राम ८०

वहारात् तथाचशब्दप्रवृत्त्यावाचार्यादेः प्रवर्त्तकत्वं। तत्राप्याचार्यादिः साक्षान्नप्रवर्त्तयति असाम
र्थ्यात् किंतुस्ववृत्तिप्रवर्त्तनाज्ञानमुत्पादयदित्यनुभवसिद्धं प्रवर्त्तनाच प्रवृत्तिप्रयोजकः प्रवर्त्तयितुर्व्यापा
रः सचचेतनस्येच्छारूपोहमेनं प्रवर्त्तयामीत्यनुभवसिद्धः अचेतनस्य शब्दादेः पदार्थान्तरं शब्दस्य द्रव्यत्वेन
समवायिकारणत्वाविरोधात् शब्दस्य च प्रवर्त्तकत्वमन्वयव्यतिरेकाभ्यां बालेनावधारितमिति स्वनिष्ठ
प्रवर्त्तनाज्ञापनेन वेदः प्रवर्त्तक इति सिद्धं यागाभिधायकाभिधाद्युतिज्ञानात् प्रवृत्तेः प्रवर्त्तनात्वेन तज्ज्ञा
नं शब्दे यागगोचरमदीयप्रवृत्त्यनुकूलव्यापारवानित्याकारकं प्रवृत्तौ हेतुः तस्य च प्रवृत्तिनिष्ठजाति
विशेषः स्वव्यवहितोत्तरप्रवृत्तित्वं वा कार्यतावच्छेदकं। शब्दाधीनप्रवृत्तित्वं कार्यतावच्छेदकमित्यन्ये। अ
भिधानिष्ठप्रवर्त्तनात्वं लिङ्पदशक्यतावच्छेदकं द्विधा भावना शाब्दभावनाऽर्थभावना चेति द्वयोरेव च किं
केन कथमित्यंशत्रयसापेक्षत्वं तत्र च शब्दनिष्ठतया शब्दव्यापारतया वा शब्दभावनापदवाच्या। तदुक्तं

४१

लिडोभिधासेवचशब्दभावनाभाव्याचतस्याः पुरुषप्रवृत्तिः संबंधबोधः करणंतद्दीयंप्ररोचनाचांगत

योपयुज्यते। तस्याः किंभाव्यमित्याकांक्षायांपुरुषप्रवृत्तिरेवभाव्याकेनेत्याकांक्षायांसंबंधबोधः प्रवर्त्त

नायांलिङः शक्तिग्रहः सहकारी प्ररोचप्रशस्तत्वज्ञानबोधिकावायुर्वैक्षेपिष्ठादेवतादृशादिकासाचप्रवृत्ति

प्रवंधकत्वेपनिरासेनोपयुज्यते प्रशस्तफलज्ञानेइष्टापेक्षयाधिकदुःखजनकत्वज्ञानंनसंभवति

तदभावेचकारणाभावान्नत्वेषइति अर्थभावनातुकर्तृव्यापारयत्नरूपातत्रचयागः करणतयास्व

र्गःकर्मत्वप्रयाप्रयाजादिरितिकर्त्तव्यतयावेतियागधारणकस्वर्गोत्पादकप्रयाजादितिकर्त्तव्यता

कर्मतयाप्रयाजादिरितिकर्त्तव्यतयावेतियागकप्रवृत्तिप्रयोजकशक्तिग्रहकरणप्ररोचनांगकव्या

पारवान्शब्दइत्यन्वयबोधयागप्रवर्त्तनाविषयःयागकारणिकास्वर्गकर्मिकाभावनाइत्यबोधः राम.

आख्यातार्थभावनायाएवभट्टमतेक्रियात्वात् आख्यातस्याच्चसर्वत्रतद्विशेष्यकबोधप्रवर्तते रूपग ८१

मात् इति कर्त्तव्यतायास्तु न शाब्दबोधे प्रवेशस्तस्या अपि सामान्यतः शाब्दबोधविषयत्वमिष्टेत्यन्ये॥
प्रवर्त्तनायाश्चार्थभावनायां जन्यतालक्षणो विषयविषयिभावः। अत्र च स्वर्गस्याक्षिपाल्लाभः आक्षेपश्च
न पश्चादनुमानं पदश्रवणस्य लेपदजन्योपस्थितेरेव तन्मते शाब्दधीहेतुत्वात् किंतु लक्षणयैवादृष्ट।
साधनत्वेपि लिङः शक्ति तच्च भावनामत्वेति यागेन स्वर्गफलं भावयेत् योगकरणिका स्वर्गकर्मिका भा
वनाहत्यैव बोधः स्वर्गस्य फलतया परम्परया स्वर्गकर्मस्यापि फलत्वेनान्वयइष्यते। अत्र यद्यपि
स्वर्गभावनाया यत्नरूपाया न यागकरणकत्वं यागस्य कृतिसाध्यतायाः सर्वसिद्धत्वात् तथापि
स्वर्गकर्मभावनायां विशेषणांशे करणतयैव विशिष्टकरणत्वं यागस्येति ध्येयं। न च यागादेरेव भावना
यां कर्मतयाऽन्वयोस्तु तस्य स्वतोऽकाम्यत्वात्। किंमेष्टसाधनताज्ञानमप्रवृत्तेः अत एवाक्षिप्तयागेष्ट
साधनताबोधोस्ति अन्यथा भावनाया इष्टसाधनत्वानुपपत्तेः। स चैवं इष्टसाधनत्वमेव विध्यर्थो

स्तु किमभिधायेति वाच्यं व्यापारभिन्नस्य कारणस्य स्वनिष्ठव्यापारद्वारैव परसमवेतव्यापारजनन
८२ कत्वमिति व्याप्तिस्तत्सिद्धेः अत्र च शब्दप्रवृत्तिहेतुज्ञानविषयव्यापारवान्नवेति विप्रतिपत्तिः
82 अत्रोच्यते यागादाविष्टसाधनत्वज्ञानं विना न प्रवृत्तिरिति तत्वाप्यनुमतं तथा च स्वेच्छास्थलीयप्र
वृत्तौ क्लृप्तकारणभावादिष्टसाधनताज्ञानादेव प्रवृत्त्युपपत्तेः इष्टसाधनत्वमेव विध्यर्थः प्रवर्त्तना
दिज्ञानस्य प्रवर्त्तकत्वे मानाभावात् न सा तदर्थः व्यापारभिन्नस्येत्यादिकं तु अनुमितिक
रणव्याप्तिज्ञानादौ व्यभिचारि प्रवृत्तिकारणत्वगर्भमपीष्टसाधनज्ञानादौ। ननु कर्तृकर्मादेर्विध्यर्थ
त्वे बाधकाभावात् परिशेषादभिधा विध्यर्थ इति तत्राह बाधकस्येति कर्तृकर्मादावित्यत्रापि बाध
कस्य सत्वादित्यर्थः। ननु तथापि यागादेः कारणस्य धर्म इष्टसाधनत्वं विध्यर्थोस्तु तत्राह हेतुत्वाद राम
नुमानाच्च मध्यमादौ वियोगतः। अन्यत्र क्लृप्तसामर्थ्यात् निषेधानुपपत्तितः॥ हेतुत्वादिष्टसाधन ८२

त्वस्य विध्यर्थत्वापकत्वात् अनुमानात् अर्थवाद् लिंगकश्रुत्यनुमानात् अत्र चेष्टसाधनत्वं न लिङर्थ इति
पूरणीयं ॥ अग्निकामो दारुणी मथ्नीयादित्युक्ते कुत इत्याकांक्षायां यतो दारुमथनमग्निसाधनं इत्युत्तरयंति
तथा चाग्निकामस्य दारुमथनमामाभिप्रायविषयः अग्निसाधनत्वादित्यनुमानं साध्यसाधनयोर्भेदे सति
भवतीष्टसाधनत्वस्य विध्यर्थत्वे सति नैव तदनुमानासंभवात् यतो दारुमथनमग्निसाधनमिति वचनवै
यर्थ्यं च विधिनैवेष्टसाधनत्वबोधनात् भवति मत्सु मित्याद्याविष्टसाधनत्वबोधेपि विध्यनुमानस्य सर्वसि
द्धांतसिद्धत्वाच्च इष्टसाधनत्वस्य विध्यर्थत्वेपद्यपीष्टत्वेन रूपेणाग्निकामस्येच्छाविषयसाधनत्वं विध्य
र्थः स चाग्निसाधनत्वेनानुमातुं शक्यते प्रकारभेदात्तथापि विशिष्याग्निसाधनत्वादिकं यदि विध्यर्थः
अग्निकामादिपदसमभिव्याहारश्च तत्तात्पर्यग्राहकस्तदेदं दूषणं । मध्यपादो मध्यमोत्तमपुरुषो लि
ङ् इष्टसाधनताविपोगात् तद्बोधकत्वात् कुर्याः कुर्यामित्यादौ लिङ् अत्रादिकं प्रतीयते । आज्ञा चा

भिप्रायएवइति प्रथमपुरुषेष्वाप्ताभिप्रायएवलिङर्थः अन्यत्रेति आज्ञा अध्येषणानुज्ञासंप्रश्नप्रार्थनाशं
८३ 83 सासु लिङ् इच्छावाचकत्वकल्पनादित्यर्थः यां वक्तुरिच्छां अनुविदधानस्तत्संभ्रमाद्विमेतिसा आप्तायातुश्रो
तरिष्टज्ञासमानः नातच्छा प्रार्थनाशुभाशंसनमाशीः। निषेधतिन कलंजं भक्षयेदित्यादेरिष्टसाधनत्वनि
षेधस्य चाधितत्वात् वक्तृवक्रानुष्ठाननुबंधित्वं च न विध्यर्थः शेत्येनेत्यादौ वाधितत्वात्स्वमतमाह विधि
र्वक्तुरभिप्रायं प्रवृत्त्यादौ लिङादिभिः। अभिधेयानुमेयात्तु कर्तुरिष्टाभ्युपेयता। अत्रादिपदं निवृत्तिपरं
सप्तमी उद्देश्यतारव्यविषयतायां तथा च प्रवृत्तिं निवृत्तिं वा उद्दिश्य वक्तुरभिप्रायः लिङादिभि
रभिधेयः। ननु एवमिष्टसाधनत्वस्याज्ञानात् कथं यागादौ प्रवृत्तिरत आह अनुमेयेति इष्टेति इष्टसा
धनत्वस्याप्युपलक्षणं निषेधस्थले न कलंजं भक्षयेदित्यादौ कलंजभक्षणे आप्ताभिप्रायविषयत्वाभा राम·
वेऽवगते इष्टसाधनत्वस्यानुमानात् लौकिकवाक्येष्वेवं प्रकारसंभवेपि वैदिके पुरुषस्यास्तित्वे। ८२

प्रमाणाभावान्नैवमिति चेत्माभूदन्यत्र विधेरेव तावदूर्ध्वं द्वपुंयोगे प्रमाणं श्रुतिकुमार्याः इति। वस्तुतस्तु
इच्छामात्रे शक्तौ। निषेधस्थले इच्छाविषयत्वाभावबोधोऽयोग्यतापराहतः बलवदनिष्टाननुबंधीष्टसा
धनत्वप्रकारकेच्छायां शक्तौ लाघवादिष्टसाधनादौ शक्तिः न च बलवदनिष्टाननुबंधीष्टसाधनत्वप्रका
रकेच्छायामेकैव शक्तिः भवन्मते इष्टसाधनादौ पृथक्शक्तिकल्पने गौरवमिति वाच्यं श्येनेनाभिचरन्
यजेतेत्यादौ बलवदनिष्टानुबंधिनि तदननुबंधित्वस्यैव इच्छाविसंवादित्वायोगात् तदननुबंधित्वप्रका
रकाभिप्रायस्यापि बाधेनाभिप्रायविध्यर्थतापक्षेऽपि इष्टसाधनत्वादिप्रकारकत्वे इच्छायां च पृथक्श
क्तेरावश्यकत्वात् तत्तात्पर्याभावेन तत्रानिष्टाननुबंधित्वप्रकारकत्वस्य नेच्छाया अन्वयः इत्यभ्युपगं
व्यञ्च लाघवादिष्टसाधनत्वादावेव पृथक् शक्तिः श्येनेनेत्यादौ तु बलवदनिष्टाननुबंधित्वे न तात्प
र्यमित्येवोपगन्तुमुचितत्वात् वस्तुतः श्येनो न हिंसा अदृष्टाद्वारकमरणोद्देश्यकमरणानुकूलव्यापार

स्येवतत्वान्न काश्यां मरणार्थं क्रियमाणशिवपूजादिव्यापारस्य अदृष्टाद्वारकेति एवं च श्येनस्य मा हिंस्यादिति
८५ निषेधविध्यस्पृष्टतया नानिष्टसाधनत्वमिति विध्यर्थस्य बलवदनिष्टाननुबंधित्वस्य न तत्र बाधः चोदनाल
85 क्षणोऽर्थो धर्म इति सूत्रार्थपदेन श्येनवारणं तु तस्यानर्थप्रयोजकतया न हिंसात्वेनाननुश्येनोऽभिचारः स च नि
षिद्ध इति चेन्न श्येनेनाभिचरन्निति सूत्रे शास्त्र्यभिचारपदं तदुच्यते तथा चाभिचारकामः श्येनेन यजेतेति तेन फ
लितं। तथा च श्येनफलमभिचारो मरणानुकूलव्यापारः स च निषिद्धः न तु श्येन इति मीमांसाद्यप
रिशीलितः पंथाः। ननु बलवदनिष्टाननुबंधित्वं दृष्टापेक्षयाऽन्यूनदुःखाजनकत्वं दृष्टापेक्षयाऽउत्
कटं तु दुःखाजनकत्वं वा नाद्यः यत्र शतं सुखान्युत्कृष्टानि शतं दुःखान्यपकृष्टानि तत्राप्रवृत्त्यापत्तेः
नांत्यः यत्र सहस्रं सुखान्यपकृष्टानि एकं दुःखं तदपेक्षया किंचिदुत्कृष्टं तत्राप्रवृत्त्यापत्तेरिति चेन्न दृ राम.
ष्टापेक्षयाऽन्यूनदुःखाजनकत्वं विध्यर्थः तदभाव एव निषेधस्थले प्रतीतिः यत दृष्टापेक्षयान्यूनदुःख ८५

जनकत्वज्ञानं दृष्टापेक्षयाऽउत्कटदुःखजनकत्वज्ञानं च पृथक् प्रतिबंधकं तत्र चोत्कटफलेच्छाऽउत्तेजिका पू
र्वोक्तस्य लब्धये च ताहशेच्छाया उत्तेजिकायाः सत्वात् प्रवृत्तिः। नव्यास्तु पापजनकत्वं विध्यर्थः तदभाव एव नि
षेधस्थले प्रतीयते॥ नञ् समभिव्याहृतविधेः पापजनकत्वे लक्षणा नञ्तात्पर्यग्राहकः इति पक्षे पापाजन
कत्वेपि नञ्शक्तिः एतेन पूर्वकल्पे पापाजनकत्वस्य प्रत्ययार्थस्य नञर्थेऽन्वये प्रत्ययानां प्रकृत्यर्थान्वयितेति
व्युत्पत्तिभंग इत्यपि निरस्तं। प्रवर्त्तकस्तु उपायगोचर नचद्वेषाभावः न तु बलवदनिष्टाननुबंधित्वज्ञानादिः द्वे
षे च बलवत्वं जातिविशेषः स च प्रवृत्त्यभावकल्प्यः अधिकमन्यत्रेत्याहुः। कृतज्ञ एव च वेदोयं परमेश्वरगो
चरः। स्वार्थद्वारैव तात्पर्यं तस्य स्वर्गादिवद्विधो॥ अयमुपगीयमानो वेद आस्तिकानां जीवातुः सर्व एव पर
मात्मविषयः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति इति श्रुतेः यत्ते नयस्तमयं जंत देवा इत्यादिः यत्तो
चैविदमुः परपत्स चक्षुरित्यादिः एकस्याक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः सार्यते च स

र्वधर्मान्परित्यज्य मामेकं शरणं व्रज। मदर्थं कर्म कौंतेय मुक्तसंगः समाचरइति न संशयेवहितेवदभागाय
८५ त्र परमेश्वरो नीयगीयते। स्मृष्टत्वेन पुरुषश्रुतेषु विमुक्तारुद्रेषु शब्दब्रह्मत्वेन मंडलब्राह्मणेषु प्रपंचेषु स्रष्ट
त्वनिष्ठपंचतयोपनिषत्सु यसत्पुरुषत्वेन मन्त्रविधिषु देहाविर्भावरूपाख्यानेषु उपास्यत्वेन च सर्वत्रेति।
ननु तेषां सिद्धार्थतया न स्वार्थपरत्वं प्रावण्णः स्रुवं तद्धृत्यादिवत् अतस्स्वार्थद्वारे वेति। न च यथावादानां प्रामा
ण्यं कार्यान्वितश्रुतस्त्यनुते धात् अतः स्वर्गादिवदिति यथा स्वर्गजनकश्रृत्यां श्रोत्रियादिप्रतिपादकानां यन्न
दुःखेनेत्याद्यर्थवादानां तत्तद्विध्येकवाक्यतया प्रामाण्यं तथा ईश्वरमुपासीतेति विध्येकवाक्यतयाइ
श्वरबोधकानामपीति अन्यथा स्वर्गादिपदानामपि स्वार्थे प्रामाण्यं न स्यादिति। विधाविति विधौ सा
त्पर्यं विधिनासहैकार्थबोधेनात्पर्यमित्यर्थः वाक्यात् वैदिकप्रशंसानिंदावाक्यानि प्रशंसानिंदाज्ञानपूर्वका राम-
निप्रशंसानिंदावाक्यत्वात् परिणति सुरसमा — फलमिति वाक्यवत्। संख्याविशेषादित्यस्य व्याख्यांतरमा ८५

हस्यामभूवं भविष्यामीत्यादि संख्यावत्तृगा। सामाख्यापि न शाखानामाद्यप्रवचनाद्दृते। कार्यतयाहि प्रा
क् संख्या उक्ता संप्रति तत्तत्पाद्यतया उच्यते स्यामभूवमित्याद्युत्तमपुरुषेण स्वतंत्रोच्चारयितुं संख्या
उच्यते। तदक्षतत्व हस्यामिति वाक्येषु स्यामित्याद्यनावत्तृगत संख्याया अभिधानात् संचस्वतंत्रोच्चारयिता
ईश्वर एव। संख्यापदार्थमन्यदाह समाख्येति सर्वो संज्ञा शाखानां कठकालापाद्याः समाख्याः संज्ञाविशेषाः
श्रूयंते ते च नाध्ययनमात्रनिबंधना अध्येतॄणामानंत्यात् अनादौ संसारे अन्येरपि तदध्ययनात् तस्मादतीं
द्रियार्थदर्शी भगवानेक एव काठकः सर्गादावस्मदाद्यत्यंतदृष्टकठादिशारीरविशेषमधिष्ठाय यां शाखामु
क्तवान् तस्याः शाखायास्तत्तन्नाम्ना व्यपदेश इति तथा च संख्यापते कथ्यते नयेति संख्या कठादिसं
ता इत्यर्थः। ननु ब्राह्मणत्वे सति अवांतरजातिभेदा एव कठादयः तद्दृद्ध्येयात तद्ददनुछेयाच्च शाखात
त्समाख्यया व्यपदिश्यते इति चेन्नक्षत्रियादेरपि तथैवाधिकारात् न च योब्राह्मणस्य विशेषः सक्षत्रि

यादौ संभवति नचक्षुरिन्द्रियादेरन्योवद्द्रष्टास्ति। सएव भगवान्‌श्कृतोनुमितः साक्षादपि दृश्यते। ननु तत्साम
८६ ग्रीरहितैकथं द्रष्टव्यः साहि वहिरिन्द्रियगर्भो मनोगर्भा वा न संभवति यच्चक्षुरादेर्नियतत्वात् मनसो वहिरस्वातं
त्र्यादिति चेन्न कार्यैकव्यंगायाः सामग्र्या निषेद्धुमशक्यत्वात् अपि च दृश्यते तावद्बहिरिंद्रियोपरमेपि अ
संनिहितदेशकालाद्यर्थसाक्षात्कारः स्वप्ने। न च स्मृतिरेवासौ पटीयसी स्मरामि स्मृतम्वेति स्वप्नानुसंधा
नाभावात् पन्न्यामिहृष्टमित्यनुव्यवसायात् न चारोपितं तत्रानुभवत्वं अबाधनात् अननुभूतस्यापि स्व
शिरश्छेदनादेरवभासनाच्च स्मृतिविपर्यासोऽसाविति च तत्‌यदि स्मृतिविषये स्मृतित्वे विपर्यासस्तदानुमन्या
महे। तथा स्मृतावेवानुभवत्वविपर्यासः। तद्धि सम्प्रयोगेन निरस्तः न च संभवस्यापि नत्वन्येनाकारेणाध्य
वसितो अन्येन ज्ञानावच्छेदकतयाऽनुव्यवसीयते तथा च स घट इत्युत्पन्नायां स्मृतौ भ्राम्यतस्तं घटमनुभवा राम.
मीति स्यात् नत्विमं घटमिति नत्वयं घट इति स्मृतेराकारः तस्मादनुभव एवासौ स्वीकार्यः अस्ति च स्वप्ना ८६

नुभवस्यापि कस्यचित् सत्यत्वं सर्वात्तत्वकाकतालीयमपि न निर्निमित्तं सर्वस्य प्रज्ञानानामपि तथात्वप्रसंगात् हेतु
श्चात्र धर्म एव स च कर्मजन्यत् योगज्ञोपि योगविधेरेवास्य यः कर्मयोगविध्योस्तुल्ययोगक्षेमत्वात् तस्माद्यो
गिनामनुभवो धर्मजत्वात् प्रमासाक्षात्कारि प्रमाणत्वादिति। अतस्तत्सामग्रीविरहोऽसिद्धस्तथापि किं
बाधकमिति चेत् द्वे ब्राह्मणी वेदितव्ये इत्यादि योगविधिवैयर्थ्यप्रसंगात् अशब्दस्यानुष्ठानुपयोगे देशादेश
कत्वात् न चाधिकारि ज्ञानविधानमेतत् अर्थज्ञानविधिनैव गतार्थत्वात्। एतेन परमाणूद्योर्व्याख्या
ताः अथ ते च न दृष्टादृष्टयोर्विशेषो विद्यते पश्यत्स चक्षुः स शृणोति स कर्णः इति द्वे ब्राह्मणी वेदितव्ये परं चा
परमेव च इति यत्नेन यत्समयं जतद्देवा इति यज्ञो वै विष्णुरित्यादि स्मर्यते च सर्वधर्मान् परित्यज्य मामेकं शरणं व्र
ज इति मदर्थं कर्म कौन्तेय मुक्तसंगः समाचर इति यज्ञायाचरतः कर्म कर्मग्रन्थिर्विलीयते। यज्ञार्थात् कर्म
णोऽन्यत्र लोकोऽयं कर्मबंधनः। अनुशिष्यते च सांख्यप्रवचन ईश्वरप्रणिधानं तमिमं ज्योतिष्टोमादिभि

रिषे : प्राणायामादिना पूर्वेन अहिंसादिभिर्यमैः आसनप्राणायामादिभिर्योगैर्महर्षयो [illegible] विदिषाति अस्मिन् ज्ञा
८७ तेसर्वं सा [illegible] भवत्येवं विज्ञाय श्रद्धैकतानस्तत्परो भवेत् अत्रेदं गीयते। मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु
87 मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः। भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरं। सुहृदं सर्वभूतानां ज्ञात्वा
मां शांतिमृच्छतीति। यस्येश्वरेणावश्यासक्तं प्रत्याह। इत्येवं श्रुतीति संप्लवजेने भूयाभिरक्षाणि ते ये षां नास्यद्
मद्धाति हृदये ते शैलसारशयाः ये पि प्रस्तुत विप्रतीपविधयोप्युच्चैर्भवच्चिंतकाकाले कारुणिकत्वयैव
रूपयाले भावनीया नराः। इति शब्दस्वरूप एवं शब्दः मकारार्थः शैलसारो लोहं प्रस्तुते ईश्वरे विप्रतीपवि
धयः प्रतिकूलप्रकाराः तादृशा अपि उच्चैरतिशयेन काले कष्टदशायां भवच्चिंतकाः शंकाकलंकशून्याः
करुणीया इत्यर्थः युष्माकं का वार्तेत्यत आह। अस्माकं तु निसर्गसुंदर चिराच्चेतो निमग्नं त्वयी त्यहान राम·
दनिधे तथापि भवनं भाग्यापि संतप्यते। तन्नाथ त्वरितं विधेहि करुणां येन त्वदेकात्मतां याचे चेतसि नापु ८७

यामश्रान्तश्रोयाभ्याः पुनर्याताः ।। अद्य सम्यग्यद्यपि त्वयि निमग्नं सत्यं तथापि तरलत्वान्न तृप्यतीत्यर्थः

८८ तृप्तिः फलेच्छाविच्छेदः त्वयि निमग्नभावस्य फलं क्षिप्रं भवत्विति इत्थमानविच्छिद्यते त्वदेकात्मतां त्वन्मा

त्रसाक्षात्कारगोचरां जनकतां ।। इत्येषनीतिकुसुमाञ्जलिरुज्ज्वलश्रीय द्वासये दक्षिणवामकोष्ठौ ।नो

वाततः किमपरेशगुरोर्गुरुस्तु प्रीतास्त्वनेन पदपीठसमर्पणेन ।। इति समाप्तो न्यायकुसुमांजलिर्दक्षिणवा

मकोष्ठं सुजनदुर्जनौ वासयेत् अनुरंजयेत् । अन्यापि कुसुमांजलिर्दक्षिणवामनासापुटे वासिते करोति । ननु

कुतर्करसिकं कथं वासयिष्यति अतो नो वेति दुर्जनानुरंजनमशक्यत्वात् । नो हेत्वयं किंतु अमरेशाद् इन्द्रस्तस्य गु

रु ब्रह्मा बृहस्पतिर्वा तस्यापि गुरुरुपदेष्टा ईश्वरः स प्रीतो भवत्वनेनेत्यर्थः ।। ।। इति पंचमस्तबकः ।। ।।

इति महामहोपाध्यायरामभद्रसार्वभौमभट्टाचार्यविरचिता न्यायकुसुमाञ्जलिकारिकाव्या राम

ख्या [illegible] समाप्ता । शुभमस्तु ८८

न्यायकुसुमांजलि टीका
1300

४९

पुस्तकमिदं रामचंद्रपाठकस्य: